सस्कृत

डिसम्बर् २००१ Rs. 10/-

चन्दमामा


Are you a fan of Garuda, the masked hero with magical powers?
Enjoy the exciting exploits of Garuda!
Garuda
The Invincible
Don't miss the Garuda comics in Chandamama anymore!
Subscribe to Chandamama today!
Chandamama Annual Subscription within India Rs. 120/-
Send your remittances by DD or MO favouring CHANDAMAMA INDIA LIMITED, to
No. 82, Defence Officers Colony, Ekkatuthangal, Chennai - 600 097.
E-mail : subscription@chandamama.org


A
ACTIVE
B
BUZZ
BOSS
C
CADET DX
D
DEVIL DX
E
ELEPHANT
F
FISH
G
GIRAFFE
H
HEN
I
INSECT
J
JOKER
K
KIDO DX
L
LI'L ANGEL
LAMBADA
LIMBO
M
MISSILE
MISS INDIA Jr
N
NEST
O
ORANGE
P
PIRANHA
Q
QUEEN Jr
R
ROBO COP
S
SPORTY
SALSA
T
TERMINATOR
HERO CYCLES
V
W
The largest range of kids bikes
HERO CYCLES
THE ABC OF CYCLING

एतस्य अङ्कस्य विशेषाः

सम्पुटः - १८ डिसेम्बर् - २००१ सञ्चिका - १०



भारतगौरवगाथा

४७



गूढभाषी संन्यासी
(वेतालकथा)

१९

यक्षपर्वतः

११

देवीभागवतम्

५१



अन्तरङ्गम्

★ उत्तमः चोरः ...७ ★ यक्षपर्वतः -१० ...११
★ गुढभाषी संन्यासी ...१९ ★ क्रिस्मस् ...२४
★ इद्-उल्-फर्,...२६ ★ कार्तिके ...२७ ★ उत्तमकार्यस्य सत्फलम् ...२८ ★ बुद्धिमान् गोपालबन्धुः ...३२
★ अनुपमं मणिपुरीयनृत्यम् ...३४ ★ शृगालस्य न्यायनिर्णयः ...३६
★ पक्वाः चणकाः कथम् अङ्कुरिताः स्युः ? ...४२
★ वार्ताविशेषः ...४४ ★ भारतम् अवगम्यताम् ...४६
★ भारतगौरवगाथा-२२ ... ४७ ★ देवीभागवतम् -३ ...५१
★ कार्ये प्रवृत्तिः ...५७ ★ भूस्वामिनः वयः ...६०
★ अजेयः गरुडः -९ ...६१
★ राजनर्तक्याः चित्रम् ...६५
★ चित्रशीर्षिकास्पर्धा ...६६

ग्राहकशुल्कम् -
अमेरिका-केनडादेशयोः कृते
प्रतिकृतिमूल्यम् - $२
वार्षिकं शुल्कं - $२०
भवदीयं धनं 'Chandamama India Limited' नाम्ना प्रेष्यताम् -
Subscription Division
CHANDAMAMA INDIA LIMITED
No. 82, Defence Officers Colony,
Ekkatuthangal, CHENNAI - 600 097
E.mail : subscription@chandamama.org

उपायनीक्रियताम्
वायुयानेन भारतेतरदेशान् प्रति
वार्षिकं (१२ सञ्चिकाः) - रू.९००/-
भारते रू. १२०/- (बुक्पोस्ट् द्वारा)
भवदीयं धनं D.D.द्वारा धनादेश(M.O.)द्वारा वा 'Chandamama India Limited' नाम्ना प्रेषणीयम् ।

विज्ञापिकादानार्थं सम्पर्क्यताम् -
चेन्नै -
Ph - 044-2347384, 2347347399
e-mail : advertisements@chandamama.org
देहली -
मोना भाटिया
Ph - 011-6515111/6565513/6565516
मुम्बयी -
शकीलनुल्ला
Ph - 022-2661599/2661946/2653057

© एतस्यां सञ्चिकायांदिश्यमानानां कथानां पूर्णस्वाम्यं प्रकाशकस्य एव । केनचित् प्रकारेण माध्यमेन वा एतस्य पूर्णतः भागशः वा स्वीकारं ये कुर्वन्ति ते न्यायानुगुणं दण्डनम् अर्हन्ति ।

संस्थापकौ –
चक्रपाणिः नागिरेड्डी च

शान्तिसौहार्दादिनिमित्तम्...

सहस्रकस्य प्रथमं वर्षं यावत् समाप्तिं गच्छत् अस्ति तावता एव श्रूयते युद्धवार्ता सप्टम्बर्मासे अमेरिकादेशे या दुर्घटना घटिता तस्याः परिणामरूपेण अक्टोबर्मासे अफगानिस्थाने घोरदिनानि आरब्धानि सन्ति । यावद् एतत् सम्पादकीयं मुद्रणालयं गच्छति तावता शान्तिविरोधिनः केचन आतङ्कवादिनः कारागारं यमलोकं वा गताः स्युः ।

यथा कुटुम्बे प्रवृत्ता काचित् अहितकरी घटना गृहसदस्यान् एकमुखीकरोति तथैव प्रपञ्चे प्रवृत्ताः अभूतपूर्वघटनाः अपि राष्ट्राणि मेलयति । अमेरिकीयघटना कारणतः उत्पन्नाः उद्वेगकोपादयः इदानीम् उपशान्ताः सन्ति । अतः ते सर्वे सम्भूय आतङ्कवादं प्रपञ्चात् उन्मूलयितुं कार्ययोजनां चिन्तयन्तः सन्ति । एतेन प्रपञ्चे जनाः शान्त्या सुखेन च जीवितुं शक्नुयुः ।

किमपि मतं परस्परसङ्घर्षं न इच्छति । सर्वाणि अपि मतानि प्रीतिं, सौहार्दं च बोधयन्ति । अन्यच्च, वयम् एतां भूमिं प्रति अतिथयः इव आगताः । अतः अग्रिमजनता अपि अत्र सुखेन वासं कर्तुं यथा शक्नुयात् तथा एतस्याः भूमेः रक्षणम् अस्माकं सर्वेषां कर्तव्यम् । यदि वयं सर्वे एवं व्यवहरेम तर्हि स्वस्य, प्रपञ्चस्य च उन्नतिः अवश्यं भवेत् ।

समग्रस्य जगतः विषये उत्तमभावः दर्शनीयः, शान्त्या जीवनीयं च इति यः एषः क्रिसमस्पर्वणः सन्देशः अस्ति तं वयं सर्वत्र प्रसारयेम ।

सम्पादकः – विश्वम्

भारतनायकस्पर्धायां भागम् ऊढ्वा प्राप्नुवन्तु अपूर्वाणि पारितोषिकाणि

भारतीयाः नायकाः-३

भवन्तः रामायणं महाभारतं च इच्छन्ति खलु ? तौ ग्रन्थौ अवलम्ब्य चिताः केचन प्रश्नाः अत्र सन्ति । उत्तरं दातुं प्रयतन्ताम् ।

समुचितोत्तरदातारः त्रयः पुरस्क्रियन्ते द्विचक्रिकादानेन

1. सूर्यदेवस्य पुत्रः एषः स्वमित्राणां निमित्तं जीवनम् एव अर्पितवान् । परोपकारः तस्य स्वभावः आसीत् । सः कः ?

   ....

2. गर्भस्थः एव सः व्यूहरचनाभेदं ज्ञातवान् आसीत् । तादृशं व्यूहं प्रविश्य बहिः आगन्तुम् अशक्तः सः मरणं प्राप्तवान् । सः कः ? ....

3. सः वानरप्रमुखः कः, यश्च रामसन्देश-वाहकत्वेन लङ्कां प्रति प्रेषितः आसीत् ?

   ....

4. इच्छामरणरूपं वरं प्राप्तवान् सः शरशय्यायां शयानः मरणार्थम् उत्तमकालं प्रतीक्षमाणः आसीत् । सः कः ?

   ....

5. एषः धनुर्विद्यानिपुणः भ्रातृभिः सह अज्ञातवासम् अनुभवन् वर्षं यावत् नाट्यशिक्षकः आसीत् । सः कः इति भवन्तः जानन्ति एव खलु ?

   ....

प्रतिप्रश्नम् उत्तरं लिखन्तु । एतेषु पञ्चसु नायकेषु प्रियतमः कः किमर्थं च इति दशभिः शब्दैः लिखन्तु । मम प्रियतमः नायकः ....

....

....

....

भागग्रहीतुः नाम ....

वयः .... कक्ष्या ....

सङ्केतः ....

....

....

पिन् .... दूरवाणी ....

एतं पुटं पृथक्कृत्य प्रेषयन्तु अधोनिर्दिष्टसङ्केताय -

भारतनायकस्पर्धा-३
चन्दमामा इण्डिया लिमिटेड्,
८२, डिफेन्स् आफीसर्स् कालोनी
एक्काट्टुतङ्गल्, चेन्नै - ६०० ०९७
उत्तरप्रेषणाय अन्तिमदिनाङ्कः - **५ जनवरी - २००२**

नियमाः -

१. अधिकाष्ट- ऊनचतुर्दशवर्षीयाः एतस्यां स्पर्धायां भागं ग्रहीतुम् अर्हन्ति ।
२. विविधभाषाभिः प्रेषितानि उत्तराणि परिशील्य त्रयः श्रेष्ठाः चीयन्ते । यदि योग्योत्तरदातारः बहवः तर्हि प्रियतमनायकविषये लिखितं वाक्यम् अवलम्ब्य चयनं क्रियते ।
३. निर्णायकानां निर्णयः एव अन्तिमः ।
४. एतं विषयम् अधिकृत्य पत्रव्यवहारः कोऽपि न करणीयः ।
५. विजेतारः पत्रद्वारा सूच्यन्ते ।

भवद्भ्यः पारितोषिकं ददाति

HERO CYCLES

उत्तमः चोरः

विद्याधरः बाल्यात् एव कवितासु आसक्तिमान् । काव्यस्य मुख्यभागं सः कण्ठस्थीकरोति स्म अपि । दशमे वयसि एव सः कवितारचनासमर्थः जातः । सः कविताः मधुरतया गायति स्म अपि ।

एकदा कश्चन बन्धुः तदीयगृहम् आगतः । सः विद्याधरस्य कविताः पठित्वा सन्तुष्टः सन् तदीयमातापितरौ अवदत् - ''एतं दण्डकारण्यस्थस्य वाणीनाथस्य आश्रमं प्रति प्रेषयन्तु । षड्वर्षाभ्यन्तरे एषः सर्वशास्त्रपारङ्गतः भविष्यति । ततः एतस्य भाविजीवनं सुखमयं स्यात्'' इति ।

तस्य बन्धोः सूचना अरोचत विद्याधरस्य मातापित्रोः कृते । अतः तौ पुत्रं दण्डकारण्यं प्रति प्रेषितवन्तौ । विद्याधरः गुरुकुले षड्वर्षाणि शिक्षणं प्राप्तवान् । सः श्रद्धया विद्याभ्यासं कृतवान् । अतः गुरुः वाणीनाथः अपि तद्विषये सुप्रसन्नः आसीत् । तं सर्वदा प्रशंसति स्म सः । किन्तु प्रत्यागमनस्य सप्ताहात् पूर्वं काचित् दुर्घटना घटिता ।

वाणीनाथः शिष्येण विद्याधरेण सह कन्दमूलफलादिसङ्ग्रहार्थम् अरण्यं गतवान् । यदा ते अरण्ये सञ्चरन्तः आसन् तदा यात्रिणः लुण्ठतः लुण्ठाकान् दृष्टवन्तः । वाणीनाथस्य शिष्यान् दृष्ट्वा ते लुण्ठाकाः धावितवन्तः । विद्याधरोऽपि एकं लुण्ठाकम् अनुसरन् धावितवान् । सः लुण्ठाकः वृक्षाणां मध्ये कुत्रापि अदृश्यतां गतः ।

तम् अन्विष्यन् विद्याधरः वृक्षस्य पृष्ठतः गतः । तत्र कश्चन मुनिः ध्यानमग्नः आसीत् । विद्याधरः भावितवान् यत् मया अन्विष्यमाणः चोरः एव एतादृशवेषेण अस्ति इति । अतः सः - ''किं वेषपरिवर्तनेन मां वञ्चयितुं प्रयत्नं करोति भवान् ?'' इति पृच्छन् कोपेन मुनेः

श्मश्रु बलात् आकृष्टवान् ।

मुनेः तपसः भङ्गः जातः । सः नेत्रे उद्घाट्य प्रवृत्तं सर्वं ज्ञात्वा विद्याधरं पश्यन् – ''अये मूर्ख ! मुनेः लुण्ठाकस्य च भेदम् अजानन् कीदृशः विद्यावान् भवान् ? माम् एव लुण्ठाकं भावितवान् खलु भवान् । अतः भवान् वर्षं यावत् चोरजीवनं यापयतु इति शपे । यस्मिन् दिने भवता चौर्यं न क्रियते तस्मिन् एव दिने भवता अधीता समग्रा विद्या विस्मृता भविष्यति'' इति शापं दत्तवान् ।

विद्याधरः मुनेः पादौ गृहीत्वा क्षमां प्रार्थितवान् । तथापि मुनिः दयां न प्रदर्शितवान् । अनन्यगतिकः विद्याधरः आश्रमं प्रत्यागत्य गुरुं वाणीनाथं प्रवृत्तं समग्रं निवेदितवान् ।

वाणीनाथः शिष्याय धैर्यं यच्छन् अवदत् – ''दैवायत्तं जगत्सर्वम् । प्रवृत्तस्य विषये अश्रुपातनमात्रेण किं प्रयोजनम् ? वर्षं यावत् प्रतिदिनं यदि चौर्यं न क्रियते तर्हि भवतः विद्या विलुप्ता भविष्यति खलु ? अतः भवान् काम्भोजनगरं गच्छतु । तत्र असङ्ख्याः धनिकाः सन्ति । धनिकाः प्रायः न्याय्येन मार्गेण धनं सम्पादितवन्तः न भवन्ति । भवान् तेषां गृहेषु चौर्यं करोतु । चौर्यसमये भवान् गृहीतः यथा न भवेत् तथा जागरूकता आश्रयणीया । एवं चौर्यं कुर्वन् भवान् चौर्यस्य सर्वाणि कौशलानि अवगतवान् भविष्यति । चौर्यम् अपि काचित् विद्या । तस्यां विद्यायां प्रावीण्यं प्राप्य भवान् ज्ञातान् अंशान् ताडपत्रे लिखतु । तत् अग्रे शासकानां गुप्तचराणां च कृते लाभकरं स्यात् । ततः राज्ये चौर्यं न्यूनं भवेत्'' इति ।

गुरोः सूचनायाः अनुसारं विद्याधरः काम्भोजं गतवान् । स्वस्य चातुर्यस्य उपयोगं कुर्वन् सः विविधैः प्रकारैः चौर्यम् आरब्धवान् । एतस्मात् नगरे महान् कोलाहलः उत्पन्नः । 'नूतनः चोरः नगरम् आगतः अस्ति' इति वार्ता सर्वत्र प्रसृता । तस्य ग्रहणार्थं सैनिकैः बहुधा प्रयासः कृतः । किन्तु तैः तं ग्रहीतुं न शक्तम् ।

गुरोः आदेशस्य अनुगुणम् आत्मना ज्ञातान् अंशान् तालपत्रेषु लिखति स्म विद्याधरः । सः श्रीकरनामकस्य मध्यमवर्गीयस्य कस्यचित् गृहे वसति स्म । तस्य पाण्डित्यस्य दर्शनात् गृहसदस्याः यथा तथैव प्रातिवेशिकाः अपि आश्चर्यचकिताः आसन् । तस्य व्यवहारः अत्युत्तमः आसीत् । अतः तस्मिन् सन्देहः

कस्यापि न जातः एव । स तु प्रतिदिनं चौर्यं करोति स्म एव । एवमेव दिनानि गतानि ।

श्रीकरस्य सुन्दरी काचित् पुत्री आसीत् । विद्याधरस्य कवितां श्रुत्वा सा नितरां सन्तुष्टा भवति स्म । कदाचित् विद्याधरः दिनं यावत् दृष्टिगोचरः न जातः । अतः सा तस्य प्रकोष्ठं गतवती । तत्र तया ताडपत्राणि दृष्टानि । तेषां पठनात् सा ज्ञातवती यत् नगरे यत् चौर्यं प्रचलति तस्य कारणं विद्याधरः एव इति । एतत् ज्ञात्वा सा आश्चर्यचकिता भीता च । तानि ताडपत्राणि गृहीत्वा यावत् सा प्रकोष्ठात् निर्गता, तावता विद्याधरः तत्र आगतः । किं प्रवृत्तं स्यात् इति तेन झटिति अवगतम् ।

''इतः परम् एकम् एव दिनम् अहम् एतस्मिन् नगरे स्थास्यामि । यावत् अहम् अत्र भवामि तावत् एषः अंशः केनापि ज्ञातः न भवेत् । भवती कथमपि एतं विषयं जानाति । यदि अन्यं कमपि भवती वदेत् तर्हि भवतीम् एव यमलोकं प्रेषयिष्यामि'' इति अवदत् विद्याधरः ।

श्रीकरपुत्री एतत् श्रुत्वा भीत्या कम्पमाना जाता । सा उक्तवती – ''एतस्य पठनात् मया ज्ञातं यत् श्वः भवान् कुत्र चौर्यं करिष्यति इति । तथापि एतां वार्ताम् अहं कमपि न वदिष्यामि । कृपया मां मा मारयतु'' इति ।

विद्याधरः तस्याः वचने विश्वासं कृतवान् । किन्तु सा स्ववचनं न पालितवती । प्रवृत्तं सर्वं पितरम् उक्तवती सा । तस्याः पिता तं विषयं नगररक्षकम् उक्तवान् । अतः अनन्तर-दिने चौर्यसमये तैः विद्याधरः विनायासं गृहीतः, कारागारे स्थापितः च ।

एषा वार्ता नगरे महान्तं कोलाहलम् अजनयत् । नगरपालकः जनानां पुरतः विद्याधरस्य विचारणां कारितवान् । तदा विद्याधरः स्वस्य कथां श्रावितवान् । सर्वं श्रुत्वा नगरपालकः अवदत् – ''भवतः कथायां मम विश्वासः नास्ति । तथापि वाणीनाथस्य आश्रमं प्रति दूतं सम्प्रेष्य वस्तुस्थितिं ज्ञास्यामि । मम केचन सन्देहाः निवारणीयाः भवता । भवान् पण्डितः । गुरोः अनुग्रहमात्रेण कृतानि चौर्याणि न ज्ञायन्ते जनैः इति कथं निर्णीतं भवता ? अन्तिम-चौर्यसमये वा भवान् गृहीतः अभवत् एव । एतस्मात् भवतः प्रयत्नाः निष्फलाः जाताः'' इति ।

''मया सामान्यजनाः न पीडिताः । धनिकानां गृहेषु एव चौर्यं कृतम् । कस्य कस्य गृहे किं किं चोरितम् इति मया विस्तरेण

लिखितम् अस्ति । चोरितं सर्वं मत्समीपे सुरक्षिततया अस्ति अपि । शापावधेः समाप्तेः अनन्तरं मया धनं प्रत्यर्पयिष्यते । एवं करणात् मया कृतस्य पापस्य प्रायश्चितं भविष्यति इति मम चिन्तनम्'' इति अवदत् विद्याधरः ।

तदा नगरपालकः हसन् उक्तवान् - ''यदा भवान् श्रीकरस्य पुत्र्यां विश्वासं कृतवान् तदा एव भवतः योजना असफला जाता । वस्तुतः अपि यदि शापात् भवतः भीतिः स्यात् तर्हि भवान् तस्याः हननम् अकरिष्यत् । किन्तु भवता तत् न कृतम् । अतः भवतः कथने विश्वासः न जायते मम'' इति ।

एतत् श्रुत्वा विद्याधरः करौ योजयित्वा उक्तवान् - ''श्रीमन् ! मया यत् चौर्यं कृतं ततः प्राप्तानि वस्तूनि प्रत्यर्पणयोग्यानि । किन्तु कस्यापि हननं कृतं चेत् प्राणान् प्रत्यर्पयितुं मम सामर्थ्यं नास्ति खलु ? अतः मया तस्याः हननं न कृतम् । तर्जनमात्रं कृतम् । शापात् अशिक्षितत्वं प्राप्येत इति भीत्या एव मया चौर्ये प्रवृत्तं, न तु धनाद्याशया । चोरेषु अपि उत्तमाः भवन्ति केचन । अनन्यगतिकतया ते चोराः भवन्ति कदाचित् । मुनिशापकारणतः चोरवृत्तिम् आश्रितः अहम् उत्तमचोरेषु अन्तर्भवामि । केचन जीविकानिर्वहणार्थं चौर्यं कुर्वन्ति । तेषु परिवर्तनम् आनेतुं मम व्यवहारः उत्तमम् उदाहरणं भवितुम् अर्हति । अन्यच्च चोररहस्यानि ताडपत्रेषु लिखितानि सन्ति मया । तेषाम् आधारेण चोराणां निग्रहणं सुलभसाध्यं भविष्यति । एवं चौर्यं कुर्वता अपि मया देशस्य उपकारः एव कृतः'' इति अवदत् विद्याधरः ।

तस्य वचनं श्रुत्वा तत्रत्याः सर्वे करताडनं कृतवन्तः । नगरपालकः विद्याधरं बन्धमुक्तं कृतवान्, तस्य सम्माननम् अपि कृतवान् ।

चौर्यरहस्यानि यानि विद्याधरेण सङ्गृहीतानि आसन् तानि अधिकारिणां गुप्तचराणां च कृते नितराम् उपकारकाणि जातानि । तेषाम् अध्ययनतः ते चोराणां निग्रहणे समर्थाः जाताः । एतस्मात् देशे चौर्याणि हननप्रकरणानि च न्यूनानि जातानि ।

यक्षपर्वतः

१०

(वीरपुरराजस्य आज्ञायाः अनुसारं सेनाध्यक्षः कैश्चित् सैनिकैः सह अरण्यं गतवान् । सः पर्वतदुर्गस्य समीपं गत्वा स्वर्णाचार्यनेतृत्वयुक्तान् समरबाह्वनुचरान् उक्तवान् यत् शरणं गच्छन्तु इति । किन्तु समरबाह्वनुचराः पराजयम् अङ्गीकर्तुं न सिद्धाः । ते शूलायुधानि गृहीत्वा वीरपुरसैनिकानाम् उपरि आक्रमणं कृतवन्तः । तैः क्षिप्तम् एकं शूलायुधं सेनाध्यक्षस्य स्कन्धे लग्नम् । अतः सः व्रणितः जातः । तदनन्तरम् ....)

स्कन्धे शूलं लग्नम् इत्यतः सेनाध्यक्षः उच्चैः आक्रन्दनं कृतवान्, अधः पतितवान् च । एतस्मात् तस्य स्कन्धे लग्नं शूलं पार्श्वे पतितम् । सैनिकाः तं दूरे नीतवन्तः, व्रणस्थलं वस्त्रपट्टिकया बद्धवन्तः च ।

अनुचरान् प्रशंसन् स्वर्णाचार्यः उक्तवान् - ''सकृत् वयं शत्रून् भीतान् कृतवन्तः । वयं यद्यपि पञ्चविंशतिः जनाः स्मः, तथापि शत्रवः चिन्तितवन्तः स्युः यत् वयं बहवः स्याम इति । अस्माकं शौर्यम् असाधारणम् इति ते चिन्तितवन्तः स्युः'' इति ।

एतत् श्रुत्वा समरबाह्वनुचरेषु अन्यतमः अवदत् - ''महामन्त्रिवर्य ! यदि शत्रवः पर्वतारोहणप्रयत्नं कुर्युः तर्हि अस्माभिः नियुक्ताः अरण्यवासिनः तान् बहुधा पीडयेयुः । सिंहव्याघ्रादयः अपि आक्रमणं कुर्युः । तेन शत्रवः इतस्ततः विकीर्णाः भवेयुः'' इति ।

तदा समरबाह्वनुचरः अपरः अवदत् - ''महामन्त्रिवर्य ! अनुज्ञा दीयताम् । वयं सर्वे सङ्घीभूय शत्रूणाम् उपरि अभिपताम । तान् सर्वान् नाशयित्वा शत्रूणाम् अश्वान् वशीकरवाम'' इति ।

स्वर्णाचार्यः तान् वस्तुस्थितिम् अवगमयन्

अवदत् - ''शत्रूणां सङ्ख्या महती अस्ति । अतः एतादृशे अवसरे त्वरा न शोभते । अस्माकं सर्वे उष्ट्राः पर्वतस्य अधोभागे सुरक्षिततया रक्षिताः स्युः खलु ?'' इति ।

''ते सर्वे पर्वतमूले सुरक्षिताः सन्ति महामन्त्रिवर्य ! अस्माकम् उभौ अनुचरौ तेषां रक्षणे नितरौ स्तः । अतः तेषां विषये चिन्ता करणीया नास्ति'' इति उक्तवान् कश्चन अनुचरः ।

''अल्पः विजयः साधितः इत्यतः युद्धम् एव समाप्तम् इति न चिन्तनीयम्'' इति वदन् स्वर्णाचार्यः अश्वारोहणोद्यतान् वीरपुरसैनिकान् दर्शितवान् ।

वीरपुरीयसैनिकाः व्रणितं सेनाध्यक्षम् अश्वस्य उपरि उपवेश्य किञ्चिद्दूरं नीतवन्तः । 'पर्वतम् आरोढुं सुरङ्गमार्गम् अन्विष्यन्तः सन्ति ते' इति अवगतवन्तः समरबाहुपक्षीयाः ।

स्वर्णाचार्यः स्वस्य अनुचरान् उद्दिश्य - ''सर्वे सावधानाः भवन्तु । शूलानि क्षेप्तुम् उद्युक्ताः च भवन्तु'' इति उक्त्वा यत्र सिंहव्याघ्रादयः स्थापिताः आसन् तत्र गतवान् ।

सिंहस्य एकं पञ्जरं गुहायाः द्वारे एव स्थापितम् आसीत् । व्याघ्राणां पञ्जराणि अपरगुहाद्वारे स्थापितानि आसन् । एकैकस्य पञ्जरस्य उपरि अपि उभौ अरण्यवासिनौ उपविष्टौ आस्ताम् ।

स्वर्णाचार्यं दृष्ट्वा अरण्यवासिनः अवदन् - ''वीरपुरीयसैनिकाः पर्वतम् आरुह्य यदा अस्मत्समीपम् आगच्छन्ति तदा वयं पञ्जराणां द्वाराणि उद्घाटयिष्यामः । ततः अस्मदीयाः पर्वतस्य ऊर्ध्वभागं प्रति धाविष्यन्ति । बुभुक्षिताः क्रूरजन्तवः शत्रून् आक्रम्य खादिष्यन्ति'' इति ।

तेषाम् एतां व्यवस्थां दृष्ट्वा स्वर्णाचार्यः तृप्तिं प्रकटितवान् । सः ततः समरबाह्वनुचराणां समीपम् आगत्य पर्वतस्य मूलभागे दृष्टिं प्रसारितवान् । वीरपुरीयसैनिकाः सेनाध्यक्षस्य आज्ञाम् अनुसरन्तः पादाभ्यां पर्वतम् आरोढुम् उद्युक्ताः आसन् । तेषु केचन धनुर्बाणादिकं धृतवन्तः आसन् ।

समरबाह्वनुचराः यदा शूलानि वर्षन्ति स्म तदा ते किञ्चित् तिष्ठन्ति स्म, बाणप्रयोगं कुर्वन्ति स्म च । एतस्मिन् एव अवसरे केचन अश्वारोहिणः उपायेन पृष्ठतः पर्वतस्य आरोहणे उद्युक्ताः अभवन् ।

स्वर्णबाहुः अपायस्य उपस्थितिम् अवगतवान् । सः अनुचरेषु धैर्यं पूरयन्

अवदत् - ''उष्ट्रवीराः ! भवन्तु केचन अश्वारोहिणां शत्रूणाम् उपरि महाशिलाः पातयन्तु । शूलादिक्षेपणं तु यथापूर्वम् अनुस्यूततया अनुवर्तताम्'' इति ।

समरबाह्वनुचराः महाशिलाः नुदन्तः वीरपुरीयसैनिकान् लक्ष्यीकृत्य पातितवन्तः । मध्ये स्थितानां वृक्षगुल्मशिलादीनां कारणतः ताः शिलाः इतस्ततः सञ्चरन्त्यः लक्ष्यस्य उपरि न पतिताः एव ।

वीरपुरीयसैनिकाः एतत् दृष्ट्वा परमानन्दम् अनुभवन्तः महता उत्साहेन अग्रे आगतवन्तः । तान् अनुसरन्तः अश्वारोहिणः आगच्छन्तः आसन् । ते उद्यतखड्गाः आसन् । राज्ञः जयकारं घोषयन्तः आसन् सर्वेऽपि ।

अत्रान्तरे व्याघ्राणां सिंहानां च आक्रमणं प्रवृत्तम् आकस्मिकतया । पञ्जरात् बहिः आगताः व्याघ्राः सिंहाः च वीरपुरीयसैनिकानाम् उपरि अभिपतितवन्तः । एतत् आक्रमणं सम्मुखीकर्तुं वीरपुरीयाः सन्नद्धाः न आसन् । अतः तेषां मध्ये महान् कोलाहलः उत्पन्नः । तेषां पृष्ठतः स्थिताः अश्वाः व्याघ्रादीन् दृष्ट्वा नितरां भीताः । अतः ते इतस्ततः धावितुम् उद्युक्ताः जाताः । केचन अश्वाः अश्वारोहिसहिततयैव पर्वतात् पतिताः । यदा पुरतः कोऽपि न स्थितः तदा सिंहव्याघ्रादयः निर्बाधम् अरण्यं प्राविशन् ।

एतत्सर्वं दृष्ट्वा स्वर्णाचार्यः नितरां सन्तुष्टः । सः अनुचरान् उद्दिश्य अवदत् - ''शत्रुसैनिकाः केचन व्रणिताः मृताः च स्युः । तथापि अवशिष्टानां शत्रूणां सङ्ख्या न अल्पा । यदि ते सम्भूय आक्रमणं कुर्युः तर्हि तान् सम्मुखीकर्तुं

वयं न शक्नुयाम । अधः ये उष्ट्राः सन्ति तान् आरुह्य इतः पलायनम् एव इदानीं श्रेयसे । इतः गच्छेम चेत् समरबाहुः, तौ उभौ क्षत्रियवीरौ च मिलिताः स्युः कदाचित् । अतः उष्ट्रसमीपं गन्तुं सर्वे सिद्धाः भवन्तु'' इति ।

एवं वदन् सः उष्ट्रान् उद्दिश्य प्रस्थितवान् । अन्ये तम् अनुसृतवन्तः ।

यदा ते निश्चितस्थलं प्राप्य उष्ट्रान् आरुह्य ततः गन्तुम् उद्युक्ताः तदा द्विशतबाहुपरिमाणदूरे खड्गहस्ताः वीरपुरीयाः सैनिकाः दृष्टाः । ते एतान् अभिमुखीकृत्य एव आगच्छन्तः आसन् ।

एतत् दृष्ट्वा स्वर्णाचार्यः स्वस्य खड्गम् उन्नीय अनुचरान् उद्दिश्य - ''अयि भोः उष्ट्रवीराः ! सर्वे माम् अनुसरन्तु । शत्रून् दुर्गादेव्यै बलिरूपेण अर्पयाम । समरबाहुमहाराजः

जयतात् !'' इति वदन् अग्रे गतवान् । वीरपुरीयसैनिकाः अपि – 'वीरपुरीयमहाराजः जयतात्' इति घोषयन्तः अग्रे आगतवन्तः ।

स्वर्णाचार्यः महता धैर्येण अग्रे गतवान् । एतत् दृष्टवताम् अनुचराणाम् उत्साहः प्रवृद्धः । ते अपि शत्रूणाम् उपरि अभिपतितवन्तः । एवम् उभयपक्षीयाणां सैनिकानां मध्ये घोरं युद्धं प्रवृत्तम् ।

पञ्च निमेषान् यावत् युद्धं प्रवृत्तम् । एतस्मिन् युद्धे उभयपक्षीयाः अपि सैनिकाः बहवः व्रणिताः । अश्वात् उष्ट्रात् च ते पतिताः । स्वर्णाचार्यः स्वस्य अनुचरान् सावधानान् कृत्वा शत्रूणां मध्यतः एव अरण्यं प्रति धावितवान् । पञ्चदश अनुचराः तम् अनुसृतवन्तः ।

तावता व्रणितः सेनाध्यक्षः तत्र उपस्थितः । धावन्तं स्वर्णाचार्यं तदनुचरान् च दृष्ट्वा सः उक्तवान् – ''शत्रूणां सङ्ख्या अङ्गुलिगणनीया आसीत् । तथापि ते पलायितवन्तः । एतत् तु नितराम् अपमानकरम् । अस्माकम् असामर्थ्यस्य अशक्ततायाः च द्योतकम् एतत् । मया यः अश्वनायकः प्रेषितः आसीत् सः क्व ? सः जीवति उत मृतः ?'' इति ।

तस्य एतम् उच्चध्वनिं श्रुत्वा अश्वनायकः सेनाध्यक्षसमीपं गतवान् । तं दृष्ट्वा सेनाध्यक्षः महता क्रोधेन – ''ते न युद्धवेषं धृतवन्तः आसन्, न वा महन्ति आयुधानि धृतवन्तः आसन् । तथापि प्रशिक्षितेषु समरनिपुणेषु अस्मासु सत्सु ते कथं पलायितवन्तः ? कथं वा ते अस्माकं कांश्चन सैनिकान् मारयितुं शक्तवन्तः ? नितरां लज्जास्पदम् एतत् । महाराजः यदि प्रवृत्तं सर्वं जानीयात् तर्हि आवाम् उभौ अपि शूलम् आरोपयेत् । किम् एतत् ज्ञायते भवता ?'' इति अगर्जत् ।

तदा दलनायकः कम्पमानस्वरेण अवदत् – ''सेनाध्यक्षवर्य ! तेषां नायकः न सामान्यः । सः यद्यपि बलहीनः इव, प्रभावहीनः इव, सामान्यः इव च भासते, तथापि सः शूरः बुद्धिमान् च अस्ति । तदीयाः अनुचराः तं 'महामन्त्रि'पदेन निर्दिशन्ति । तस्य पराक्रमं,

बाहुबलं च पश्यामः चेत् भासते यत् सः महाभारतयोद्धा इव अस्ति इति । ...''

दलनायकस्य कथनं मध्ये एव स्थगयन् सेनाध्यक्षः उच्चस्वरेण अवदत् - ''अये ! एतत् गुणगानं स्थगयतु । स्वकर्तव्यं स्मरतु । पञ्चभिः सैनिकैः सह इतः निर्गत्य अरण्यं प्रविशतु । ते कुत्र निलीय स्थिताः इति ज्ञात्वा तान् गृह्णातु । तदभ्यन्तरे अहं दुर्गं वशीकरिष्यामि । वीरपुरस्य ध्वजं दुर्गस्य उपरि उड्डाययिष्यामि । ततः अहम् अपि ससैन्यः भवतः मार्गम् अनुसरिष्यामि । मम आदेशं यथास्थितं पालयतु'' इति ।

दलनायकः ततः प्रस्थितवान् । किन्तु तावता स्वर्णाचार्यः ततः सुदूरं निर्गतवान् आसीत् । मध्येमार्गं तेन एकं सरोवरं दृष्टम् । स्वर्णाचार्यः समरबाह्वनुचराः च तत्र गमनं स्थगितवन्तः । जलं पीत्वा उष्ट्रान् जलं पायितवन्तः च । ततः चरणार्थं ते उन्मुक्ताः । समरबाहोः द्वौ अनुचरौ फलानाम् आहरणार्थं ततः गताः । एवम् एव अर्धघण्टा अतीता । फलार्थं गतौ तौ सरोवरसमीपे उभौ भल्लूकचर्मधारिणौ दृष्टवन्तौ । तौ धावन्तौ स्वर्णाचार्यसमीपम् आगत्य एतां वार्तां श्रावितवन्तौ ।

''एतादृशाः भल्लूकचर्मधारिणः एव समरबाहोः बन्धनं कृतवन्तः आसन्'' इति स्वर्णाचार्यः यावत् वदन् आसीत् तावता तौ भल्लूकचर्मधारिणौ तत्समीपम् एव आगतौ । तयोः अन्यतरः उष्ट्रं दृष्ट्वा अन्यस्मै प्रदर्शयन् - ''अम्ब ! वृकेश्वरि ! भवती एव शरणम् अस्माकम्'' इति अवदत् ।

अनन्तरक्षणे वृक्षाणां मध्यतः स्वर्णाचार्यः

तदनुचराः च - ''समरबाहुमहाराजः जयतात्'' इति वदन्तः शूलायुधं गृह्णन्तः तयोः दिशि गतवन्तः । एतत् दृष्ट्वा नितरां भीतौ भल्लूकचर्मधारिणौ - ''हे वृकेश्वरि ! किं कृतं भवत्या ! आवाम् इदानीम् अपायग्रस्तौ स्वः'' इति वदन्तौ ततः पलायितवन्तौ ।

धावन्तौ भल्लूकचर्मधारिणौ दृष्टवन्तः खड्गवर्मा, जीवदत्तः, समरबाहुः, भल्लूकगुरुः च तयोः मुखात् स्वर्णाचार्यस्य वार्तां ज्ञातवन्तः ।

''स्वर्णाचार्यः तु दुर्गनिर्माणकार्ये व्यग्रः आसीत् । तस्य आगमनं कथम् अभवत् अत्र ? सः अपायग्रस्तः तु न स्यात् खलु ?'' इति संशयपुरस्सरम् उक्तवान् जीवदत्तः ।

''स्वर्णाचार्यस्य स्वामिभक्तिः अप्रतिमा । सः भल्लूकचर्मधारिभ्यः मां रक्षितुम् अत्र आगतवान् स्यात्'' इति सन्तोषेण उक्तवान्

समरबाहुः ।

एवं वार्तालापं कुर्वन्तः ते सरोवरसमीपम् आगतवन्तः । तान् दृष्ट्वा स्वर्णाचार्यः नितरां सन्तुष्टः । सः तेषां समीपे धावन् गत्वा – ''समरबाहुमहाराज ! क्षत्रियवीरौ ! एषः प्रणमाञ्जलिः मम'' इति नमस्कुर्वन् अवदत् ।

''स्वर्णाचार्य ! एवं भाति यत् दुर्गनिर्माण-कार्यम् असमाप्य एव भवान् अरण्ये विहारार्थम् आगतः इति । एवं ननु ?'' इति अपृच्छत् जीवदत्तः ।

''क्षत्रियवीरौ ! तच्च दुर्गम् इदानीं शत्रूणाम् अधीनं जातम् । अहं समरबाह्वनुचराः च तस्य रक्षणार्थं यथाशक्ति प्रयत्नं कृतवन्तः । किन्तु ततः फलं तु न सिद्धम् । केचन अस्मदीयाः स्वर्गं गताः'' इति खेदेन उक्तवान् स्वर्णाचार्यः ।

''इदानीं कति अनुचराः अवशिष्टाः ?'' इति पृष्टवान् खड्गवर्मा ।

''माम् अपि अविहाय षोडश जनाः । अस्माकं वाहनभूताः उष्ट्राः अपि अत्रैव सन्ति'' इति उक्तवान् स्वर्णाचार्यः ।

''किम् उक्तम् ? शत्रुभिः दुर्गम् आक्रान्तम् इति ? किं तत् शत्रूणाम् अधीनम् अस्ति इदानीम् ? ते शत्रवः के ?'' इति कठोरस्वरेण पृष्टवान् समरबाहुः श्मश्रुणः उपरि हस्तं स्थापयन् ।

स्वर्णाचार्यः प्रवृत्तं सर्वं निवेदितवान् ।

सर्वं श्रुत्वा समरबाहुः दीर्घं निश्श्वसन् उक्तवान् – ''एतस्य तात्पर्यं यत् दुर्गे रहस्यरूपेण सङ्गृहीतं धनं शत्रूणाम् अधीनं जातं स्यात् इति । एवं तर्हि वीरपुरमहाराजः क्षमायोग्यः न । तस्य अन्त्यं करणीयम् एव । खड्गवर्मन् ! जीवदत्त ! भवतोः साहाय्यं विना मम लक्ष्यं पूर्णं भवितुं न अर्हति'' इति ।

जीवदत्तः क्षणं यावत् विचिन्त्य अवदत् – ''समरबाहो ! भवतः गणः अल्पः आसीत् । अन्यच्च वीरपुरीये प्रदेशे भवान् दुर्गं निर्मान् आसीत् । तत् निवारितं वीरपुरीयैः । एवं स्थिते प्रतीकारस्य का वा प्रसक्तिः ? अरण्ये कस्मिंश्चित् प्रदेशे कृषिं कुर्वन् अनुचरैः सह वसन् सुखेन जीवतु । एतस्मात् भवतः काऽपि चिन्ता न भविष्यति'' इति ।

समरबाहुः उत्तरं किमपि न दत्तवान् । सः शिरः अवनमय्य मौनेन स्थितः आसीत् । तदा स्वर्णाचार्यः अवदत् – ''वीरवरौ ! मम काचित् विज्ञप्तिः अस्ति । एतस्य नामश्रवणतः स्पष्टं ज्ञायते यत् एषः क्षत्रियकुलीयः एव कश्चित् इति । एषः महाराजः स्यात्, अहं च

एतस्य मन्त्री स्याम् इति मम इच्छा । भवतोः साहाय्यं प्राप्तं चेदेव मम इच्छा पूर्णा भवेत् । अतः निराकृतिः न दर्शनीया इति मम प्रार्थना । पर्वतप्रदेशात् वीरपुरराजस्य अपसारणं कृत्वा समीपस्थग्रामेषु आधिपत्यं संस्थाप्य एकं राज्यं तु संस्थापयितुं शक्यम् । भवतोः साहाय्यम् अस्ति चेदेव एषः स्वप्नः साकारतां गच्छेत्'' इति ।

जीवदत्तः खड्गवर्मणं पश्यन् अवदत् – ''खड्गवर्मन् ! एतावतः साहाय्यस्य दाने न काऽपि आपत्तिः स्यात्'' इति ।

ततः सः स्वर्णाचार्यं पश्यन् अवदत् – ''आदौ अस्माभिः वीरपुरीयसैनिकानां विषये चिन्तनीयम् । ते सङ्ख्यया अधिकाः स्युः, वयं तु अल्पाः । अतः प्रत्यक्षयुद्धे तान् जेतुं न शक्नुयाम कदाचित् । उपायेन कार्यं साधनीयम् अस्माभिः । अतः ते सैनिकाः भल्लूकगुरोः गुहां प्रति कथमपि आनेतव्याः'' इति ।

''एतत् कथं शक्येत जीवदत्तवर्य ?'' इति सन्देहेन अपृच्छत् स्वर्णाचार्यः ।

''तत् तु न कष्टकरम् । भल्लूकगुरोः शिष्येषु द्वित्राः वीरपुरीयं सेनाध्यक्षं दृष्ट्वा वदन्तु यत् वयं सर्वे गुहायां निलीय स्थिताः स्मः इति । अस्मान् मारयितुं ते गुहां प्रविशेयुः एव'' इति अवदत् जीवदत्तः ।

ततः सः भल्लूकगुरुं पश्यन् अपृच्छत् – ''भल्लूकगुरो ! भवतः शिष्याः कदाचिदपि भवतः वचनं न तिरस्करिष्यन्ति इत्येतत् सत्यं खलु ? कदाचिदपि ते गुरुद्रोहं न आचरन्ति खलु ?'' इति ।

''श्रीमन् ! अहम् आज्ञां करोमि चेत् ते पर्वतशिखरात् पतितुम् अपि सन्नद्धाः भवन्ति । अत्र पर्वतः नास्ति इत्यतः तत् प्रत्यक्षं दर्शयितुं न शक्नोमि'' इति जीवदत्तम् उक्त्वा सः अनुचरान् उद्दिश्य आज्ञापयत् – ''भवत्सु कश्चित् उन्नतस्य वृक्षस्य शिखरं प्राप्य ततः कूर्दनं करोतु'' इति ।

जीवदत्तः 'एवं मास्तु' इति बहुधा वदन् आसीत् चेदपि कश्चन भल्लूकचर्मधारी सैनिकः समीपस्थम् एकं वृक्षम् आरुह्य अन्तिमशाखां प्राप्य – ''गुरुवर्य ! एषः मम अन्तिम-प्रणामः । आशिषा अनुग्राह्यः अहम्'' इति वदन् अधोमुखतया शाखातः उत्पतितवान् एव ।

– *(अनुवर्तते)*



ORISSA
The soul of India

अत्रास्ति प्रश्नावली !!

कोणार्कः

December
1-5, 2001
Konark Festival

ओरिस्सानगरे स्थिते कोणार्के जगत्प्रसिद्धः सूर्यदेवालयः अस्ति । एषः त्रयोदशे शतके निर्मितः । एतस्य शिल्पकला अत्यपूर्वा ।

कोणार्कपदस्य अर्थः भवितुम् अर्हति - 'कोणस्य अर्कः' इति । तन्नाम 'एषः प्रदेशः सूर्यसम्बन्धिकोणः' इति तात्पर्यं सिद्ध्यति ।

सूर्यस्य रथत्वेन एषः देवालयः निर्मितः अस्ति । एतस्य रथाकारकस्य देवालयस्य द्वादश चक्राणि सन्ति । सप्त अश्वाः एतं रथं वहन्ति । द्वादश चक्राणि द्वादश मासान् सङ्केतयन्ति । तथैव सप्त अश्वाः सप्ताहस्य सप्त वासरान् द्योतयन्ति । एतत् मन्दिरं बङ्गलोपसागरस्य तीरे अस्ति । अतः तस्मिन् पतिताः सूर्यकिरणाः प्रतिफलिताः सन्तः मन्दिरशोभां वर्धयन्ति । एषः देवालयः 'कृष्ण-पगोडा' इति निर्दिश्यते । सप्ततिमीटरौन्नत्ययुक्तम् एतस्य शिखरम् अद्य विनष्टम् अस्ति । तथापि नृत्यशाला, सभाभवनम् इत्यादयः अक्षताः एव सन्ति । समग्रे मन्दिरे उत्तमा शिल्पकला परिदृश्यते । 'युनेस्को'संस्थया वैश्विक-पारम्परिक-सम्पत्ति-क्षेत्रत्वेन परिगणितेषु एतत् अपि अन्यतमम् अस्ति ।

कोणार्के वस्तुसङ्ग्रहालयः अपि कश्चन अस्ति । तस्मिन् भग्नावशेषाणां मध्यतः चित्वा संरक्षितानि अमूल्यशिल्पानि सन्ति । दर्शनयोग्यः अस्ति अयं वस्तुसङ्ग्रहालयः ।

प्रश्नोत्तरस्पर्धा भवदर्थम् !

ऊनचतुर्दशवर्षीयाः अत्र भागं वोढुम् अर्हाः !!

1. सूर्यदेवालयात् अनतिदूरे कुशभद्रसमुद्रयोः सङ्गम-स्थले अपरः प्रसिद्धदेवालयः अस्ति । सः कः ?

....

2. पूर्वं नौकास्थानं यत् आसीत्, तत् इदानीं च समुद्र-विहारस्थलम् (बीच्) अस्ति । तस्य नाम किम् ?

....

3. कः जलबन्धः एशियाखण्डे एव अतिबृहत् कृत्रिम-सरोवरम् इति ख्यातं सरोवरं निर्माति ?

....

भवताम् उत्तराणि रिक्ते स्थले लिखित्वा नाम-सङ्केतादिभिः अधस्तनं विवरणपत्रं प्रपूर्य अधोनिर्दिष्ट-सङ्केताय प्रेषयन्तु -

Orissa Tourism Quiz Contest
Chandamama India Limited
No.82, Defence Officers Colony
Ekkatuthangal, Chennai - 600 097

नाम - ....

वयः - ....

सङ्केतः - ....

....

Pin : .... Phone ....

Winners picked by Orissa Tourism in each contest will be eligible for 3-days, 2-night stay at any of the OTDC **Panthanivas**, upto a maximum of four members of a family. Only original forms will be entertained. The competition is not open to CIL and Orissa Tourism family members. Orissa Tourism, Paryatan Bhaven, Bhubaneswar-751 014. Ph: (0674) 432177, Fax : (0674) 430887, e-mail : ortour@sancharnet.in. Website : Orissa-tourism.com

वेताल-कथा

गूढभाषी संन्यासी

घोरः अन्धकारः । विद्युतः स्फुरन्ति । मेघाः गर्जन्ति । शृगालादीनां रवः श्रूयते । मार्गपार्श्वे पतिताः कपालादयः भयं जनयन्ति । तथापि दृढव्रती त्रिविक्रमः पुनरपि वृक्षम् आरुह्य शवं स्कन्धे आरोप्य अधः आगत्य यथापूर्वं मौनेन श्मशानाभिमुखं प्रस्थितवान् ।

तदा शवान्तर्गतः वेतालः अवदत् – ''अये राजन् ! किमर्थं भवता एवं व्यर्थप्रयत्नः क्रियते ? असाफल्यं निश्चितम् इति भवान् जानाति एव । तथापि एतस्मिन् कार्ये प्रवृत्तिः किमर्थम् भवतः ? बहुधा असाफल्यं प्राप्य अपि भवान् किमर्थं विवेकं न प्राप्नोति इत्येव आश्चर्यं मम । कः जामातृत्वेन



प्राप्तात् अनुभवात् यः विवेक न प्राप्नोति तं किं वा वदेम ? मूर्खः इति खलु ? किं भवान् मूर्खः भवितुम् इच्छति ? न खलु ? कः भवन्तम् एतस्मिन् कार्ये प्रवर्तितवान् ? कश्चन निगूढभाषी संन्यासी राजा वा भवन्तम् अत्र प्रवर्तितवान् न स्यात् खलु ? निगूढभाषिणाम् अन्तरङ्गे किम् अस्ति इति अवगमनं महते क्लेशाय । एतम् अंशं स्पष्टीकर्तुम् अहं काञ्चित् कथां श्रावयामि । मार्गायासपरिहारार्थं तां कथां श्रद्धया शृणोतु तावत्'' इति ।

अनन्तरं तेन कथा आरब्धा –

पूर्वं मार्तण्डदेवः नाम कश्चन राजा आसीत् । सः कञ्चित् आप्तसहायकम् इच्छति स्म । युक्तायुक्तपरिज्ञानवान् विवेकी बुद्धिमान् जनः आप्तसहायकत्वेन चेतव्यः इति तस्य इच्छा ।

मणिभद्रः नाम कश्चन तादृशः तस्य आस्थाने आसीत् । तम् आप्तसहायकस्थाने नियोक्तुं यावत् राजा चिन्तयन् आसीत् तावता राज्ञी अपरं नाम सूचितवती । तच्च आसीत् विश्वबन्धुः इति । विश्वबन्धुः राज्ञ्याः मातुलः ।

''मम मातुलः विश्वबन्धुः मणिभद्रात् अपि श्रेष्ठतरः । सः अनुभवी ज्येष्ठः चापि । शासनव्यवहारे उच्चस्थाने बान्धवाः एव नियोजनीयाः इति किं भवान् न जानाति ? बान्धवाः एव नियुक्ताः चेत् शासनरहस्यानि गोपितानि भवन्ति । अन्यः कदापि विश्वासार्हः न भवति । अतः आप्तसहायकस्थाने स्थातुं सः एव योग्यः । अतः तम् एव नियोजयतु'' इति उक्तवती राज्ञी ।

''शासनपदे नियुक्तिसमये बान्धव्यं प्रामुख्येन न परिगणनीयम् इति मम अभिप्रायः । नियोज्यमानस्य सामर्थ्यं प्राधान्येन द्रष्टव्यम् । अन्यथा राज्यं विनष्टं स्यात् । भवत्या यथा उक्तं तथा विश्वबन्धुः एतत्स्थानार्थम् अर्हः एव चेत् तस्य नियुक्तौ मम न कोऽपि आक्षेपः । अतः उभयोः अपि सामर्थ्यस्य परीक्षां करवाम । तत्र यः उत्तीर्णः भवति सः एव तत् स्थानम् अलङ्करिष्यति'' इति राजा अवदत् । राज्ञी एतत् मौनेन अङ्गीकृतवती ।

तयोः परीक्षार्थं कश्चन सन्निवेशोऽपि अविचिन्तिततया उपस्थितः । राजधान्यां कश्चन वणिक् वसति स्म । तस्य एका सुन्दरी पुत्री आसीत् । तां परिणेतुं त्रयः तरुणाः इच्छन्ति स्म । त्रयाणाम् अपि समानयोग्यता । अतः

स्वीकरणीयः इति वणिजः समस्या ।

राजधानीतः अनतिदूरे पर्वते कश्चन संन्यासी निवसति स्म । तस्मिन् विशेषादरः आसीत् वणिजः । तान् त्रीन् अपि संन्यासिनः समीपं प्रेषितवान् वणिक् । संन्यासिनः निर्णयम् आदेशं भावयति स्म सः ।

संन्यासी त्रीन् अपि क्षणकालं परीक्षादृष्ट्या दृष्टवान् । ततः कमपि किमपि अनुक्त्वा एकैकस्मै एकैकं वस्तु दत्तवान् सः । एकस्मै तेन मृत्तिका दत्ता, अपरस्मै जलं दत्तं, तृतीयाय च धान्यं दत्तम् । ततः त्रयः अपि आश्रमतः प्रत्यागताः । एकैकोऽपि आत्मना आनीतं वस्तु वणिजे प्रदर्शितवान् ।

तेषां दर्शनात् मुनेः आशयः कः इति न ज्ञातं वणिजा । 'तत् ज्ञातुं बुद्धिमान् एव समर्थः, राज्ञः आस्थाने एव तादृशाः भवन्ति' इति निर्णीय सः तैः त्रिभिः सह राज्ञः आस्थानम् आगतवान् । स्वसमस्यां राजानं निवेद्य परिहारोपायं प्रार्थितवान् च ।

राजा तान् त्रीन् एव पृष्टवान् - ''मुनेः आशयः कः स्यात् ?'' इति ।

''महाराज ! मुनिवरेण मह्यं मृत्तिका दत्ता । मृत्तिका एव सर्वस्य आधारः । आधारं विना किं वा तिष्ठेत् लोके ? एवमेव मृत्तिकां विना जलेन धान्येन वा न किमपि प्रयोजनम् । अतः वणिजः पुत्रीं परिणेतुम् अर्हः अहम् एव इति मुनिवरेण सूचितं मृत्तिकादानेन'' इति उक्तवान् प्रथमः ।

ततः द्वितीयः अवदत् - ''भूमिः धान्यं च जलं विना न प्रयोजनाय । जलमेव जगतः आधारः । तादृशं श्रेष्ठं जलं मह्यं यच्छता



मुनिवरेण मम श्रेष्ठता ज्ञापिता । अतः एतस्य वणिजः पुत्रीं परिणेतुम् अहम् एव अर्हः इति तु निश्चितम् । एतत् एव ज्ञापितं मुनिवरेण मह्यं जलं यच्छता'' इति ।

एतदनन्तरं तृतीयः अवदत् - ''यदि धान्यम् एव न स्यात् तर्हि भूमिजलयोः सद्भावेऽपि किं वा फलं प्राप्येत ? ततः सस्यं तु न वर्धते । धान्यस्य पोषिके भूमिजले । धान्यम् एव प्रमुखम् । तत् मह्यं यच्छता मुनिवरेण मम अर्हता प्रमाणीकृता । अतः वणिजः पुत्रीं परिणेतुम् अर्हः अहम् एव, न अन्यः'' इति ।

तेषां त्रयाणाम् अपि वचनं युक्तियुक्तं तर्कसम्मतं च आसीत् । अतः एतेषु कः अर्हः इति निर्णेतुम् अशक्तः अभवत् राजा । तदा मौनेन स्थातुम् अशक्तः त्रिविक्रमः

'विश्वबन्धु-मणिभद्रयोः सामर्थ्यस्य परीक्षार्थम् अयम् एव योग्यः कालः' इति सः अचिन्तयत् । तौ तस्मिन् काले तत्रैव आस्ताम् अपि ।

राजा विश्वबन्धुं पश्यन् अपृच्छत् - ''एतस्मिन् विषये भवतः आशयः कः ?'' इति ।

''जलम् एव श्रेष्ठम् इति अहं भावयामि । जगताम् आधारः जलम् । तत् विना धान्यं भूमौ न वर्धते । जलाभावे भूमिः निष्फला, बीजं च व्यर्थम् । अतः जलप्राप्तिकर्ता एव श्रेष्ठः इति मम निर्णयः'' इति अवदत् विश्वबन्धुः ।

''भोः, भवान् किम् अभिप्रैति एतस्मिन् विषये ?'' इति मणिभद्रं पश्यन् पृष्टवान् राजा ।

''महाराज ! तेषां वस्तूनां परीक्षणं विना अहं किमपि वक्तुं न शक्नोमि'' इति उक्तवान् मणिभद्रः । ततः तेन त्रयः अपि पदार्थाः परिशीलिताः सूक्ष्मेक्षिकया ।

तदनन्तरं तेन उक्तम् - ''यस्मै मृत्तिका दत्ता सः एव वणिजः पुत्रीं परिणेतुम् अर्हः इति मुनिवरस्य आशयः'' इति ।

किन्तु एतावता राजा न तृप्तः । सः अनन्तरदिने संन्यासिनम् एव राजास्थानं प्रति आनायितवान् ।

संन्यासी राजानम् अवदत् - ''राजन् ! रत्नानि सदा विरलानि । भवतः आस्थाने तादृशं श्रेष्ठं रत्नम् अस्ति । तत् अभिजानातु आदौ । ततः भवतः, देशस्य च हितं भविष्यति'' इति ।

राजा मार्तण्डदेवः क्षणकालं चिन्तितवान् । तावता मुनेः वचनस्य आशयः तेन स्पष्टतः ज्ञातः इव । अतः तस्य मुखे मन्दहासः उत्पन्नः । तस्य समस्या परिहृता आसीत् । सः योग्यम् एव आप्तसहायकस्थाने नियोजितवान् ।

एवं कथाम् उक्त्वा वेतालः त्रिविक्रमम् अवदत् - ''अये राजन् ! संन्यासी कश्चन निगूढभाषी आसीत् । तस्य वचनस्य किं तात्पर्यम् ? तच्च तात्पर्यं राज्ञा कथम् अवगतम् ? राजा च कम् आप्तसहायकस्थाने नियोजितवान् ? तम् एव किमर्थं नियोजितवान् सः ? सर्वम् एतत् निगूढम् इव दृश्यते खलु ? एतस्य निगूढरहस्यस्य तात्पर्यं जानन् अपि यदि भवान् न वदेत् तर्हि भवतः शिरः सहस्रधा भग्नं भवेत्'' इति ।

अवदत् – ''राजा मार्तण्डदेवः महाबुद्धिमान् । यदा त्रयाणां युवकानां वचनानि श्रुतानि तदा निर्णये अस्पष्टता आसीत् तस्य इति तु सत्यम् । विश्वबन्धु-मणिभद्रयोः कथनस्य श्रवणात् तु सा अस्पष्टता इतोऽपि अधिकतया प्रवृद्धा इत्यपि सत्यमेव ।

मम पुत्र्याः निमित्तं योग्यं वरं मुनिवरः सूचयिष्यति एव इति वणिजः दृढविश्वासः आसीत् । मुनिवरः गूढतया भाषते इत्यपि सः जानाति स्म । गूढार्थस्य तात्पर्यं कथमपि ज्ञातं चेत् योग्यः वरः प्राप्तः इव इति चिन्तयन् सः समस्यां राजसमीपम् आनीतवान् । मुनीश्वरस्य वचने राज्ञः अपि विश्वासः आसीत् । गूढवचनं यदा श्रुतं तदा राजा किञ्चित् चिन्तितवान् । 'श्रेष्ठरत्नम्' इति वदन् मुनिः मणिभद्रम् एव सूचयन् अस्ति इति सः अवगतवान् । रत्नमण्योः अर्थसादृश्यस्य बलात् तेन तथा अवगतम् आसीत् । अतः मणिभद्रम् एव स्वस्य आप्तसहायकत्वेन नियुक्तवान् सः ।

मणिभद्रस्य निर्णयक्रमं परिशीलयाम । सः मृत्तिकां, जलं, धान्यं च परीक्षितवान् । आपाततः दर्शनात् त्रयाणाम् अपि समान-प्राधान्यं दृश्यते स्म । यदा परीक्षा कृता तदा धान्यजलयोः दोषपूर्णता मणिभद्रेण अवगता । जलं प्रायः दुर्गन्धयुक्तं मलिनं च आसीत् । धान्यम् अङ्कुरोत्पादनसमर्थं न आसीत् । किन्तु मृत्तिका च स्वच्छा सुगन्धयुक्ता च आसीत् । एतम् अंशम् अवलम्ब्य मणिभद्रः निर्णीतवान् यत् मृत्तिकां प्राप्तवान् एव योग्यः वरः इति । राजा एतत्सर्वं दृष्टवान् आसीत् एव । अतः मणिभद्रविषयकः पक्षपातः तस्मिन् गूढतया उत्पन्नः आसीत् । किन्तु मुनिः अपि गूढशैल्या यदा तदेव सूचितवान् तदा तस्य निर्णयः स्पष्टः अभवत् । अतः एव सः मणिभद्रम् एव आप्त-सहायकस्थाने नियुक्तवान्'' इति ।

एवं वदता त्रिविक्रमेण मौनभङ्गः कृतः आसीत् । अतः शवान्तर्गतः वेतालः ततः अदृश्यः भूत्वा वृक्षस्य शाखाम् अव-लम्बितवान् ।



भारतीयाः उत्सवाः

क्रिस्मस्

यदा डिसेम्बर्मासः उपस्थितः भवति तदा क्रिश्चियन्जनबहुले प्रदेशे श्रूयते- 'जिङ्गल् बेल्स्....'गीतस्य मधुरध्वनिः । क्रिस्मस्-उत्सवकाले सान्ताक्लूस्, उपायनानि, महाहरिणः, हिमप्रदेशे सञ्चरन् वृषभशकटः, केक्स्खाद्यानि इत्यादीनि सर्वाणि स्मृतिपथम् आयान्ति । डिसेम्बर्-मासस्य २५ तमः दिनाङ्कः येसुक्रिस्तस्य जन्मदिनम् । येसुक्रिस्तः एव क्रैस्तमतस्य संस्थापकः । तस्य जन्मदिने उत्सवः आचर्यते प्रपञ्चे सर्वत्रापि ।

क्रिस्मस् सद्भावस्य पर्व । सन्तोषसुखयोः अनुभवार्थं स्थितं पर्व तत् । भारतीयाः क्रिश्चियन्जनाः स्वप्रदेशस्य पद्धत्यनुगुणम् एतम् उत्सवम् आचरन्ति ।

उत्सवदिने सर्वाणि गृहाणि दीपेन अलङ्क्रियन्ते । दीपैः, नक्षत्रैः, अन्यैः अलङ्कारवस्तुभिः च अलङ्कृतः क्रिस्मस्-वृक्षः गृहाणाम् आपणानां च पुरतः प्रतिष्ठाप्यते । केषुचित् गृहेषु क्रिस्तस्य जीवनघटनाः अवलम्ब्य रचिताः पाञ्चालिकाः प्रदर्शनार्थं स्थाप्यन्ते ।

प्रतिगृहं स्फुटतया उद्भासमानं नक्षत्र-आकारकम् अलङ्कारवस्तु उत्तोल्यते । केषुचित् नगरेषु ग्रामेषु च एतस्य स्थापन-स्थलस्य औन्नत्यम् अवलम्ब्य स्पर्धा अपि भविष्यति । दक्षिणभारते जनाः वेणु-शलाकाभिः निर्मिते नक्षत्राकारके दीपं संस्थाप्य तत् गृहस्य पुरतः उत्तोलयन्ति ।

क्रिस्मस्पर्व निमित्तीकृत्य भजनप्रियाणां गणः गायन् प्रतिगृहं गच्छति क्वचित् ।

क्रिस्मस्सम्प्राप्तितः पूर्वं मध्यरात्रे प्रभाते च चर्च्तः सन्देशः प्रसार्यते । जनाः तत् श्रुत्वा मित्राणि बान्धवान् च मिलन्तः शुभाशयं कथयन्ति । परिवाराणां समावेशः, महा-भोजोत्सवः इत्यादयः उत्सवस्य अङ्गतया प्रचलन्ति । क्रिस्मस्केक्खाद्यं विना प्रायः क्रिस्मस्पर्व न समाप्तिम् एष्यति । फलादीनां रसेन निर्मितेन मद्यार्केण सह केक् खाद्यते ।

निर्मीयतां क्रिस्मस्वृक्षः

क्रिस्मस्पर्व आसन्नम् अस्ति । सर्वत्र आनन्दतरङ्गाः दृश्यन्ते । उत्सवाचरणोत्साहः स्थाने स्थाने परिदृश्यते । एतम् उत्सवं निमित्तिकृत्य हस्तकौशलकलायां निपुणेन हस्तेन निर्मितेन वृक्षेण भवदीयं गृहम् अलङ्कुर्वन्तु । एतदर्थं साधनानि नाम – कर्तरी, दृढपत्राणि, संश्लेषकं च । वृक्षनिर्माणार्थम् अधस्तनसूचनाः अवधानपूर्वकम् अनुसरन्तु –

१. एतं पुटं दृढपत्रे संश्लेष्य तत् दृढपत्रम् चित्रानुगुणं कर्तयन्तु ।
२. चित्रे यथा दर्शितं तथा 'अ'चित्रस्य अधोभागे 'ब'चित्रस्य ऊर्ध्वभागे च विदारणं कुर्वन्तु ।
३. ततः 'ब'चित्रस्य विदारितभागे 'अ'चित्रस्य विदारितभागं योजयन्तु ।
४. वृक्षस्य ऊर्ध्वभागे नक्षत्राकारं योजयन्तु ।
५. ततः अलङ्कारं यथारुचि कुर्वन्तु वर्णमयगोलकादिभिः । एतदर्थं संश्लेषकस्य उपयोगं कुर्वन्तु ।

इदानीं सिद्धः खलु रमणीयः क्रिस्मस्वृक्षः ! एतत् नीत्वा सुन्दरतया प्रदर्शनपेटिकायाः अन्तः स्थापयन्तु ।

इद्-उल्-फर्

'इद् मुबारक्' इत्येतत् अभिनन्दनवचनं वयं सदा शृणुमः इद्-उल्-फर्दिने । एतत् 'रम्झान् इद्'नामकं पर्व मुस्लिमपर्वसु एव अतिविशिष्टम् । 'रमदान्'नामकस्य मुस्लिमीयमासस्य अन्तिमे भागे एतत् पर्व आचर्यते । रमदान्मासे नूतनः चन्द्रः यदा उदेति तदनन्तरदिने इद्पर्व आचर्यते । एतस्मिन् वर्षे इद्-उल्-फर्-पर्व भविष्यति डिसेम्बर्मासस्य १७ दिनाङ्के ।

एतस्मिन् मासे सर्वेषु अपि दिनेषु दिवासमये उपवासम् आचरन्ति मुस्लिमाः । सूर्योदयात् पूर्वम् आहारं सेवितवन्तः ते सूर्यास्तानन्तरं चन्द्रं दृष्ट्वा एव आहारं सेवन्ते । तन्मध्ये जलमपि न सेवन्ते ते ।

इद्दिने बान्धवान् मित्राणि च शुभाशयं वदन्ति ते । समग्रः जातिसमुदायः सम्भूय प्रार्थनां करोति । प्रार्थनार्थम् आगन्तारः बहवः इत्यतः विशाले क्रीडाङ्गणे एषः प्रार्थनाकार्यक्रमः प्रचलति ।

'खाजी'नामकः धर्मगुरुः पूजास्थले नायकत्वं वहति । प्रार्थनानन्तरं सः उद्बोधकभाषणं करोति । उपवासः, बन्धुमित्रैः सह मेलनम् इत्यादयः उत्सवस्य विशेषाः भवन्ति ।

इद्पर्वदिने सर्वे मुस्लिमाः दरिद्रेभ्यः किमपि यच्छन्ति एव । धनधान्यफलादिकं यत् अर्जितं तस्य कञ्चन भागं दानरूपेण यच्छन्ति ते । दानं कृत्वा एव प्रार्थनासभां प्रति गन्तव्यम् एकैकेन अपि ।

शियामुस्लिमानां कृते रमदानमासस्य एकविंशतितमं द्वाविंशतितमं च दिनं पवित्रतमम् । धर्मप्रवर्तकस्य मोहम्मदस्य जामातुः आलिनामकस्य पुण्यदिनं तत् ।

पवित्रः कुरान्ग्रन्थः एतस्मिन् एव दिने स्वर्गात् भूलोकम् आगतः इति मुस्लिमानां विश्वासः । पवित्रमासस्य अन्तिमेषु दशसु दिनेषु कदाचित् पवित्रः कुरान्ग्रन्थः अदृश्यतां गतः इति ते भावयन्ति । एतानि दिनानि 'लैलुट्-उल्-कदर्' इति निर्दिश्यन्ते । 'प्रकाशीयरात्रयः' इति तस्य पदस्य अर्थः । पवित्रस्य कुरान्ग्रन्थस्य स्फुरणं कदा भवति इति अल्लाहः(देवः) धर्मप्रवर्तकश्चापि जानीतः, न अन्ये इति मुस्लिमाः भावयन्ति ।

कार्तिकै

'कार्तिकै'पदस्य अर्थः दीपोत्सवः इति । एषः उत्सवः आचर्यते तमिळुनाडुराज्ये ।

कर्त्तिकमासे एषः उत्सवः आचर्यते । एतस्मिन् वर्षे एषः उत्सवः भविष्यति नवम्बर्मासस्य ३० दिनाङ्के । त्रिदिनात्मकः एषः उत्सवः ।

शिवः पञ्चभूतात्मकतया विभक्तः सन् तमिळुनाडुराज्ये निवसति इति जनानां विश्वासः । तस्य शिवस्य आराधनार्थम् अयम् उत्सवः ।

तिरुवण्णामलैप्रदेशे स्थिते अरुणाचले शिवः पञ्चभूतेषु अन्यतमस्य अग्नेः रूपेण तिष्ठति इति जनाः भावयन्ति । प्रतिवर्षं कार्त्तिकमासे भरणीनक्षत्रं यदा उदेति तदा अत्र पर्वतशिखरे दीपः प्रज्वाल्यते ।

'वर्षाकालसमाप्तिं द्योतयति अयम् उत्सवः' इत्यपि श्रूयते ।

यदा कार्त्तिकमासस्य आरम्भः तदा गृहिण्यः देहल्याः पुरतः मृद्दीपं ज्वालयन्ति । यस्मिन् दिने तिरुवण्णामलैप्रदेशे पर्वते श्रेष्ठदीपः ज्वाल्यते तस्मिन् दिने सर्वेषु तमिळुगृहेषु विशेषपूजा प्रचलति । गृहं परितः देहल्यां च मृद्दीपानां पङ्क्तिः आरच्यते ।

तण्डुलपिष्टं, गुडं, घृतं च मिश्रीकृत्य निर्मितं दीपम् उत्सवदिने प्रातः ज्वालयन्ति प्रतिगृहम् । शिवसम्बद्धानि गीतानि अपि गीयन्ते । पारम्परिकपद्धत्या शिवः पूज्यते च । दीपावलीनिमित्तम् आनीतासु स्फोटिकासु अवशिष्टाः एतदवसरे आनन्देन स्फोटयन्ति बालाः ।

उत्तमकार्यस्य सत्फलम्

पूर्व महाराष्ट्रराज्ये खेडगाँव्नामकः ग्रामः आसीत् । तत्र सन्दीपः नाम बालकः वसति स्म । सः अन्धः । किन्तु तस्य स्वभावः उत्तमः । अतः ग्रामस्य सर्वे जनाः तस्मिन् प्रीतिं दर्शयन्ति स्म । किन्तु तदीयः पिता तस्मिन् कुप्यति स्म । ''अन्धस्य भवतः स्थित्या मम किम् ? कस्यापि कार्यस्य करणे तु भवान् असमर्थः । यदि भवान् इतः निर्गच्छेत् तर्हि एकस्य उदरस्य पोषणकार्यं वा न्यूनं भवेत् । अतः इतः निर्गच्छतु भवान् । भिक्षया उदरं पूरयतु'' इति उक्त्वा पुत्रं गृहात् निष्कासितवान् सः ।

सन्दीपः गृहात् निर्गतः । विशाले जगति एकाकी सः । तदीया शुनकी मोती एका एव तस्य सहायिका । मार्गपार्श्वे उपविश्य गानेन अल्पं धनं सम्पादयति स्म सन्दीपः । तदेव तयोः उदरपूरणस्य आधारः । एवम् एव पञ्च वर्षाणि गतानि । गृहात् सुदूरं गतौ तौ ।

एकस्मिन् सायङ्काले नितरां श्रान्तौ सन्दीपः मोती च कस्यचित् मन्दिरस्य पुरतः स्थितवन्तौ । आदिनं परिश्रमं कृत्वापि अल्पः एव आहारः प्राप्तः आसीत् ताभ्याम् । ''मोति ! भोजनात् पूर्वम् अहम् अल्पां विश्रान्तिम् इच्छामि । एतस्मात् आन्ध्यजीवनात् अहं नितरां जुगुप्सितः अस्मि । धिक् मम असहायकताम्'' इति अवदत् सन्दीपः । अनुकम्पं दर्शयन्ती मोती पुच्छं चालितवती । तदीयं पादं जिह्वया लीढवती च । सन्दीपः निद्रामग्नः जातः ।

निद्रायां तेन कश्चन स्वप्नः दृष्टः । काचित् सुन्दरी देवता तस्य पुरतः प्रत्यक्षीभूय - ''सन्दीप ! सन्दीप ! किं मां द्रष्टुं शक्नोति भवान् ?'' इति पृष्टवती ।

''अहम् अन्धः अस्मि खलु ? कथम् अहं भवतीं द्रष्टुं शक्नुयाम् ?'' इति पृष्टवान् सन्दीपः ।

''सन्दीप ! अलं खेदेन । अहं भवतः साहाय्यं करोमि । यथा यथा भवान् उत्तमं कार्यं करोति तथा तथा भवता दृष्टिशक्तिः प्राप्यते । किन्तु यदि अनुत्तमं कार्यं

क्रियते तर्हि प्राप्ता अपि दृष्टिशक्तिः लुप्ता भविष्यति । एतम् अंशं मनसि निधाय व्यवहरतु'' इति उक्तवती सा देवता । ततः सा अदृश्यतां गता ।

ततः सन्दीपः जागरितः । मोती अपि उत्साहेन तं परितः अटितवती । ''मोति ! इदानीं खादाव । श्वस्तनं दिनम् उत्तमं स्यात् आवयोः'' इति उक्तवान् सन्दीपः ।

पूर्वदिनस्य स्वप्नं स्मरन् एव उत्थितवान् सन्दीपः । ''यदि अहम् एतं प्रपञ्चं द्रष्टुं शक्नुयां तर्हि अहो, कियत् उत्तमं स्यात्'' इति स्वगतम् उक्तवान् सः । प्रपञ्चदर्शनकल्पना एव तस्मिन् रोमाञ्चम् अजनयत् । सः मोत्या सह प्रस्थितवान् ।

मध्येमार्गं कश्चन अन्धः वृद्धः भिक्षुकः मिलितः । सः प्रार्थितवान् - ''अहम् अन्धः वृद्धः भिक्षुकः अस्मि । कृपया किमपि यच्छन्तु'' इति ।

''अहम् अपि अन्धः दरिद्रः च । किं अहं दद्याम् ?'' इति पृष्टवान् सन्दीपः ।

''किन्तु भवान् न वृद्धः, न वा पङ्गुः । अतः किमपि सम्पादयितुं शक्नुयात् एव'' इति अवदत् वृद्धः ।

एतत् श्रुत्वा अनुकम्पां प्राप्तवान् सन्दीपः तस्मै वृद्धाय एकं रूप्यकं दत्तवान् । वृद्धः धन्यवादपुरस्सरं तत् स्वीकृतवान् ।

अनन्तरक्षणे एव सन्दीपेन अल्पा दृष्टिशक्तिः प्राप्ता इव । सः नितरां सन्तुष्टः । नेत्रे पुनः पुनः उन्मील्य निमील्य च सः दृष्टिप्राप्तिं दृढीकृतवान् । अन्धकारः पूर्ववत् गाढः इव न दृश्यते स्म इदानीम् । ''मोति ! मोति ! मम स्वप्नः अवितथः जातः । मम अन्धता किञ्चिदिव अपगता'' इति आनन्देन उक्तवान् सन्दीपः । मोती तं परितः अटन्ती लघुभषणं कुर्वती आनन्दं प्रकटितवती ।

तद्दिने रात्रौ काचित् वृद्धा खादनार्थम् आहारं प्रार्थितवती । सन्दीपः आत्मनः खादनार्थं यां रोटिकां रक्षितवान् आसीत् ताम् एव निस्सङ्कोचं तस्यै दत्तवान् । सा वृद्धा आनन्दाश्रूणि स्रावयन्ती तां रोटिकां स्वीकृतवती । तदा सन्दीपस्य दृष्टिशक्तिः पुनरपि किञ्चित् प्रवृद्धा । ''किं रात्रौ चन्द्रोदयः भविष्यति ?'' इति तां वृद्धां पृष्टवान् सन्दीपः । ''इदानीम् एव चन्द्रः उदितः अस्ति'' इति उक्तवती वृद्धा । ''अहम् अपि चन्द्रं किञ्चिदिव द्रष्टुं शक्नोमि'' इति आनन्देन उक्तवान् सन्दीपः ।

अनन्तरदिने यदा उत्थितं तदा महती बुभुक्षा



आगच्छतु, इदानीम् एतस्य प्रायश्चित्तं करणीयम् आवाभ्याम्'' इति खेदेन वदन् सन्दीपः तत् स्थलं प्राप्तवान्, यत्र च कुक्कुटः प्राप्तः आसीत् । कस्यापि कुक्कुटः नष्टः वा इति जनान् पृष्टवन्तौ तौ ।

''आम् । कश्चन निर्धनः स्वस्य एकं कुक्कुटम् अपश्यन् खिन्नः अस्ति'' इति अवदत् कश्चित् ।

''मम शुनकी अज्ञानेन कञ्चित् कुक्कुटम् अमारयत् । तस्य विक्रयणेन प्राप्तं धनम् एतत् । एतत् तस्मै कुक्कुटस्वामिने ददातु'' इति वदन् तस्मै धनं दत्तवान् सन्दीपः ।

बाधते स्म सन्दीपं मोतीं च । यतः गतरात्रौ तयोः भोजनं न आसीत् । ''मोति ! गच्छाव, कुत्रापि आहारः प्राप्येत वा इति पश्याव'' इति अवदत् सन्दीपः ।

ततः तौ मार्गे गतौ । तावता कश्चन कुक्कुटः मार्गम् आगतः । मोती कुक्कुटम् अनुसृत्य गत्वा तं मारयित्वा मुखेन गृहीत्वा आनयत् । एतत् ज्ञात्वा सन्दीपः नितरां सन्तुष्टः । ''मोति ! एतं विपण्यां विक्रीय प्राप्तेन धनेन किमपि क्रीणामि'' इति वदन् सन्दीपः मोत्या सह विपणिं गत्वा कुक्कुटं विक्रीतवान् । ततः अधिकम् एव धनं प्राप्तं तेन ।

धनप्राप्त्या यावत् तौ सन्तोषम् अनुभवन्तौ आस्तां तावता सन्दीपस्य दृष्टिशक्तिः क्षीणा जाता । ''मोति ! मया प्राप्ता दृष्टिशक्तिः पुनः विलुप्ता । यत् अस्मदीयं न तस्य विक्रयणं कुर्वद्‌भ्याम् आवाभ्याम् अनुचितं कृतम् ।

अनन्तरक्षणे एव दृष्टिशक्तौ अल्पः परिष्कारः जातः । एतस्मात् आनन्दितः सन्दीपः बुभुक्षाम् एव विस्मृतवान् ।

अनन्तरदिनेषु सन्दीपः बहूनि उत्तम-कार्याणि कृतवान् । तस्य परिणामतः तस्य दृष्टिशक्तिः उत्तमा जाता । इदानीं सः वस्तूनि अभिज्ञातुं शक्नोति स्म दिवाकाले ।

एकदा तौ नदीतीरे गच्छन्तौ आस्ताम् । ''मोति ! इदानीं मम दृष्टिशक्तिः क्रमेण वर्धमाना अस्ति । दैवानुग्रहात् एतत् सम्पन्नम् । भवती मम उत्तमं मित्रं मार्गदर्शकः च'' इति वदन् प्रीत्या शुनक्याः शिरः स्पृशन् आसीत् सन्दीपः । तावता कश्चन क्रन्दनध्वनिः श्रुतः । नद्यां मज्जन् कश्चन साहाय्यं प्रार्थयमानः आसीत् उच्चैः । सन्दीपः तस्य साहाय्यं कर्तुम् इच्छति । किन्तु दृष्टिशक्तिः पूर्णतः न प्राप्ता इत्यतः भीतिः तस्य । मोती तु तरणकुशला ।

किन्तु तस्याः अपायः कोऽपि जातः चेत् .. इति भीतिः । क्रन्दनध्वनिः पुनरपि श्रुतः । अन्ते सन्दीपः मनः दृढीकृत्य मोतीम् आदिशत् – ''मोति ! रक्षतु तम्'' इति । मोती नदीजले न्यपतत् ।

नद्यां पतितः जनः तीरं प्राप्तवान् । सन्दीपः तस्य समीपं गत्वा अवदत् – ''भवान् कुशली खलु ? मम शुनकी क्व ?'' इति ।

''मित्र ! भवतः शुनक्या मम प्राणाः रक्षिताः । किन्तु तां रक्षितुम् अहम् अशक्तः'' इति खेदेन दीर्घं निश्श्वसन् उक्तवान् सः जनः ।

तदा सन्दीपः अश्रूणि स्रावयन् उच्चैः क्रन्दितवान् – ''मोति ! मोति ! क्व गता भवती ? भवतीं विना कथम् अहं जीवेयम् ?'' इति ।

तदा सः पुरुषः सन्दीपस्य स्कन्धे प्रीत्या हस्तं स्थापयन् अवदत् – ''अलं रोदनेन । भवतः पितरम् उक्त्वा अन्यं शुनकं दापयामि । खेदः मास्तु'' इति ।

''तत् सौभाग्यं कुत्र मम ? मम पिता पञ्चभ्यः वर्षेभ्यः पूर्वम् एव मम आन्ध्यं दृष्ट्वा खिन्नः सन् मां गृहतः निष्कासितवान्'' इति महता खेदेन उक्तवान् सन्दीपः ।

एतत् श्रुत्वा सः पुरुषः सन्दीपं क्षणकालम् आश्चर्येण दृष्ट्वा अपृच्छत् – ''किं भवान् सन्दीपः ? मम सन्दीपः ?'' इति ।

सन्दीपः तं सम्यक् दृष्टवान् । सः आसीत् तदीयः पिता एव । सन्दीपः इदानीं स्पष्टतया पितरं द्रष्टुं शक्नोति स्म । तस्य आन्ध्यं पूर्णतः अपगतम् आसीत् ।

पिता सन्दीपं प्रेम्णा पश्यन् अवदत् – ''वत्स ! सन्दीप ! मया अविवेकेन अपराधः कृतः आसीत् । क्षन्तव्यः अहम् । वत्स ! गृहम् आगच्छतु । भवतः आन्ध्यस्य निवारणार्थं चिकित्सां कारयिष्यामि'' इति ।

सन्दीपः पितरं निर्निमेषं पश्यन् आसीत् । एतत् दृष्ट्वा पिता आश्चर्येण अपृच्छत् – ''सन्दीप ! अपि भवान् द्रष्टुं समर्थः ? कथम् एतत् सिद्धम् ?'' इति ।

सन्दीपः प्रवृत्तं सर्वं श्रावितवान् । ततः तौ आनन्देन गृहं प्रति प्रस्थितवन्तौ ।

पिता सन्दीपाय अपरं शुनकं दापितवान् । तस्य नाम निश्चितवान् सन्दीपः – 'मित्री' इति । किन्तु तेन मोती कदापि न विस्मृता । मोत्याः कारणात् एव तेन सम्पूर्णदृष्टिशक्तिः प्राप्ता आसीत् ।

बुद्धिमान् गोपालबन्धुः

गोपालबन्धुः राज्ञः कृष्णचन्द्रस्य आस्थाने विदूषकः आसीत् । कदाचित् म्लानमुखः राजा तेन लक्षितः । कारणं पृष्टः राजा अवदत् – ''नवाबः मम खेदस्य कारणम् ।'' ''समस्यां मां वदतु । ताम् अहं परिहरिष्यामि'' इति अवदत् गोपालः ।

''भूमेः दैर्घ्यं मातव्यम्, आकाशस्थानि नक्षत्राणि च गणनीयानि इति नवाबः माम् आदिष्टवान् अस्ति'' इति अवदत् राजा । ''एतदुभयम् अपि असाध्यं न । एतदर्थं लक्षं रूप्यकाणि वर्षात्मकं कालावधिं च याचतु'' इति असूचयत् गोपालः ।

राजा नवाबस्य पुरतः स्वस्य अपेक्षाम् उपस्थापितवान् । ''लक्षं रूप्यकाणि तु दीयन्ते । वर्षात्मकः कालावधिः किमर्थम् ?'' – नवाबः अपृच्छत् । ''भूमेः मापनं तु अहोरात्रं कर्तुं शक्यते । किन्तु नक्षत्राणि रात्रौ एव गणनीयानि खलु ? तदर्थं तावान् अवधिः आवश्यकः'' – राजा अवदत् ।

राजा लक्षं रूप्यकाणि गोपालाय दत्त्वा पृष्टवान् – ''वस्तुतः अपि वर्षाभ्यन्तरे तत् कार्यं करिष्यते खलु भवता ?'' इति । ''भवान् चिन्तां मा करोतु । वर्षानन्तरम् अहम् आगमिष्यामि'' इति उक्त्वा ततः निर्गतवान् गोपालः ।


एकं वर्षम् आनन्देन यापितवान् सः । जनाः तं पृच्छन्ति स्म – ''राजास्थानं प्रति गमनं नास्ति किम् ?'' इति । गोपालः वदति स्म – ''राजा मह्यं विशेषकार्यं दत्तवान् अस्ति । तस्य समाप्तिपर्यन्तं मया आस्थानं प्रति गन्तव्यं नास्ति'' इति ।
वर्षावधिः यदा समाप्तः तदा गोपालः राजानं दृष्टवान्, ''कार्यं समाप्तं महाराज'' इति उक्तवान् च । ''किं भूमेः दैर्घ्यं दृष्टम् ? किं नक्षत्राणि गणितानि ?'' राजा अपृच्छत् । ''आम् ! श्वः नवाबसमीपं गच्छाव'' इति उक्तवान् गोपालः ।
अनन्तरदिने राजा नवाबस्य आस्थानं प्रति प्रस्थितः । गोपालः तम् अनुसृतवान् । दशशकटमितानि जालानि अपि नीतानि । दश मेषाश्च नीताः ।
''एषः गोपालः मत्प्रतिनिधित्वेन भवदुक्तं कार्यं कृतवान्'' इति नवाबम् उक्तवान् राजा । ''अस्तु, गणनां वदतु'' इति उक्तवान् नवाबः । ''जालानां रज्जुः यावद्दीर्घा तावदेव दैर्घ्यं भूमेः । मेषाणां शरीरे यावन्ति रोमाणि तावन्ति एव नक्षत्राणि लोके'' इति अवदत् गोपालः । नवाबः राजा च एतत् श्रुत्वा आश्चर्येण स्तब्धौ ।

भारतीयः साम्प्रदायिकः नृत्यप्रकारः

अनुपमं मणिपुरीयनृत्यम्

मणिपुरे नृत्यम् अपि जीवनस्य अविभाज्यम् अङ्गम् । मणिपुरम् इत्यस्य शब्दस्य अर्थः 'रत्नानां नगरी' इति । पूर्वम् एतत् नगरं गन्धर्वाणां विद्याधरादीनां वा वासभूमिः आसीत् इति श्रूयते । तत्कारणतः एव स्यात् मणिपुरीयाणां सर्वेषाम् अपि नृत्ये अत्यासक्तिः । मणिपुरीयनृत्यं मणिपुर-राज्यम् इव एव परमसुन्दरम् । भारतस्य उत्तरपूर्वीयभागे पर्वतानां मध्ये स्थितस्य मणिपुरस्य सौन्दर्यं वर्णनातीतम् ।

मणिपुरीयनृत्ये चीनादेशस्य प्रभावः स्फुटतया दृश्यते । सप्तमे क्रिस्तशके चीनादेशीयाः अत्र आक्रमणं कृत्वा वासं कृतवन्तः । स्थानीयजनाः तैः परिणीताः अपि । तत्कारणतः नूतना इण्डो-मुङ्गोलियन्जनजातिः एव निर्मिता अभवत् ।

एषः नृत्यप्रकारः अतिप्राचीनः । विंशतिशतकस्य पूर्वार्धे प्रसिद्धः बङ्गालीयः कविः रविन्द्रनाथठागोरः समग्रे देशे एतस्य नृत्यप्रकारस्य जन-प्रियतां कल्पितवान् । १९२० तमे वर्षे मच्छिमपुरे तेन ऐदम्प्राथम्येन एतत् नृत्यं

दृष्टम् । ततः सः नितराम् आकृष्टः ।

तदनन्तरकाले कलाशिक्षणार्थम् एव संस्थापितस्य शान्तिनिकेतनस्य नृत्यपाठ्यक्रमे मणिपुरीयनृत्यप्रकारम् अपि योजितवान् सः ।

मणिपुरीयनृत्यस्य जानपदीयः, साम्प्रदायिकः, आधुनिकः च प्रकारः समग्रतया निसर्गसम्बद्धः । मणिपुरीयनृत्यप्रकारेषु प्रसिद्धेषु अन्यतमः अस्ति 'रासः' । सः राधाकृष्णयोः प्रेमजीवनकथाम् अवलम्बते ।

मणिपुरीयनृत्यम् एकव्यक्तिप्रदर्शनयोग्यं यथा, तथैव सामूहिकम् अपि । 'दोलयात्रा' 'होलीपर्व' इत्यादिषु प्रसङ्गेषु सामूहिकनृत्यं क्रियते तत्रत्यैः । एतादृशेषु नृत्येषु महिलाः पुरुषाः चापि सोत्साहं भागं वहन्ति ।

'राखुवल्'नामकं नृत्यं पुरुषैः एव प्रदर्श्यते । कृष्णः स्वस्य अनुचरैः सह यत् व्यवहृतवान् तां कथाम् अवलम्बते तत् । वर्णमयः वेषः नृत्यस्य सवेगगतिं भूषयति । 'लै-हरौबा' इत्येतत् अपरं सामूहिकं नृत्यम् । यथा प्रेमसम्बन्धिनी लैलामजनूकथा, हीररञ्जाकथा च सुप्रसिद्धा तथैव 'खम्बा-तोयबी'कथा अत्र प्रसिद्धा । सा एतस्मिन् नृत्ये प्रदर्श्यते ।

पुरुषैः प्रदर्श्यमानं मणिपुरीयनृत्यं वेगयुक्तम्, उपवेशनोत्थानादि-अङ्गचालनयुक्तं च । 'खोल'नामकस्य वाद्यस्य ध्वनेः अनुगुणं तेषां नृत्यकाराणां पदानां निवेशः भवति ।

एतानि नृत्यानि प्रायः मधुरगानेन सहैव भवन्ति । 'खोल'नामकं वाद्यं प्रायः सर्वेषु नृत्येषु उपयुज्यते । 'एकतारा' यथा तथैव एकतन्त्रीयुक्तम् अपरं वाद्यम् अपि अत्र उपयुज्यते । एतयोः उपयोगतः तालवैविध्यम् उत्पद्यते । परमोच्चनीचतालभेदः, तारमन्द्रस्वरभेदः इत्यादयः महता वेगेन यत् परिवर्तन्ते तत् द्रष्टृषु महान्तम् आनन्दम् उत्साहं च जनयति । मणिपुरीयनृत्यकाराः (पुरुषाः) कदाचित् खोलवाद्यं खञ्जनीवाद्यं च स्वयं गृह्णन्ति नृत्यावसरे ।

उत्कलीया जानपदकथा

तेषां वासः

उत्कलमूलजातीयाः बिहारः, मध्यप्रदेशः, छत्तीसगढः, झारखण्डः, ओरिस्सा, महाराष्ट्रम् इत्यादिषु बहुषु मध्यभारतीयराज्येषु निवसन्ति । एवं हि श्रूयते - 'दक्षिणभारते पूर्वं कोङ्कणजातीयाः आसन् । जनसङ्ख्या-वृद्धिकारणतः ते उत्तरभारतं प्रति गताः । सहस्राधिकवर्षेभ्यः पूर्वम् एषा घटना प्रवृत्ता' इति ।

द्राविडपरम्परायाः प्रमुखजातिषु अन्यतमा अस्ति उत्कलजातिः इति भाव्यते ।

शृगालस्य न्यायनिर्णयः

जीतुः कश्चन उत्कलमूलीयः । सः मुखवायुना ध्वनिम् उत्पादयन् नदीतीरे स्थिते अरण्ये गच्छन् आसीत् । नद्याः अपरतीरे स्थिते *'बस्ती'* इत्यत्र तदीयं श्वशुर-गृहम् अस्ति । तस्य पत्नी कर्मी, बालः पुत्रः च इतःपूर्वम् एव तत्र गतौ आस्ताम् । श्वशुरगृहस्य बालस्य निमित्तम् आयोज्य-मानस्य 'छठी'कार्यक्रमस्य निमित्तं गच्छन् आसीत् सः । अरण्ये इतस्ततः दृष्टिं प्रसारयन् गच्छन् आसीत् सः । तदा एकस्मात् गुल्मात् गच्छन् कश्चन कूर्मः तेन दृष्टः ।



'अहो, अद्य सुदैवम्' इति स्वगतं वदन् तं कूर्मं ग्रहीतुम् उद्युक्तः अभवत् जीतुः । तम् उन्नेतुं समग्रं बलम् उपयोक्तव्यम् अभवत् । एतस्मिन् प्रयत्ने सः स्विन्नः अपि । 'इदानीं श्वशुरगृहं गच्छन् अहं रिक्तहस्तः नास्मि । अतः निस्सङ्कोचं तत्र गन्तुम् अर्हामि' इति सः अचिन्तयत् ।

नदीपर्यन्तम् एव तस्य वसतिक्षेत्रस्य सीमा । वसतिसीमायां सुन्दराः *'सर्ण'* वृक्षाः सन्ति । तेषां वृक्षाणां मध्ये अस्ति आराध्यदेवस्य *'सर्णबुर्हिया'* मूर्तिः । अग्रे गमनात् पूर्वं तस्यै मूर्त्यै श्रद्धया नमस्कारं समर्पितवान् जीतुः ।

यदा तेन नदी दृष्टा तदा तस्य हृदये कम्पः आरब्धः । नदी पूर्णप्रवाहयुक्ता आसीत् । 'मया अद्य कथं वा श्वशुरगृहं प्राप्तुं शक्येत ?' इति अचिन्तयत् सः ।

वस्तुतः नदी न अतिगभीरा । सामान्यदिनेषु सर्वे पादाभ्याम् एव नदीं क्रामन्ति स्म । अतः नदीक्रमणार्थं सेत्वादिकं न निर्मितम् आसीत् । 'किं करणीयम्' इति सः किञ्चित् अचिन्तयत् । कश्चन उपायः तस्य मनसि स्फुरितः । तस्य दृष्टिः कूर्मे पतिता ।

जीतुः स्नेहपूर्णेन स्वरेण कूर्मम् अपृच्छत् – ''मित्र ! किं भवान् मां नद्याः अपरतीरं प्रापयितुं शक्नुयात् ? नद्यां प्रवाहः अधिकतया दृश्यते । अहं पादाभ्यां तां क्रमितुं न शक्नोमि'' इति ।

'अहो, एते मानवाः कथं क्षणाभ्यन्तरे एव स्वव्यवहारे परिवर्तनं दर्शयन्ति ! एतेषु कदापि विश्वासः न करणीयः । किन्तु एतस्मात् स्वस्य रक्षणार्थं कश्चन अवकाशः लब्धः अस्ति इदानीम् । अतः एतेन उक्तस्य कार्यस्य करणे एव मम लाभः' इति सः अचिन्तयत् ।

''अस्तु, भवता उक्तं कार्यं करिष्यामि । प्रतिफलरूपेण भवता अपि मम साहाय्यं करणीयम् । अपरतीरं यदा प्राप्यते तदा मम बन्धनं न करणीयं पुनरपि । किम् एतत् अङ्गीक्रियते भवता ?'' इति अपृच्छत् कूर्मः । जीतोः अन्या गतिः न आसीत् । अतः सः

तेषां भाषा

वस्तुतः उत्कलमूलजातीयानां भाषा 'कुरुख'नामिका । किन्तु गच्छता कालेन विविधभाषाणां प्रभावः तेषां भाषायाः उपरि जातः । अन्यभाषासम्मिश्रणम् अपि जातम् । अतः अद्य तैः भाष्यमाणायाः भाषायाः नाम अस्ति – *'सद्रि'* इति ।

तेषाम् आकारः

एतज्जातीयानां पुरुषाणाम् औन्नत्यं मध्यम-प्रमाणकम् । कृष्णम् अविस्तृतं च शिरः । दीर्घा नासिका । दृढं शरीरम् । महिलानां मुखस्य अवयवाः पार्थक्येन भासन्ते, येन च नृत्यसमये भावाभिव्यञ्जनं स्फुटं भवति ।

एतं प्रस्तावम् अङ्गीकृतवान् ।

''अहं भवन्तं न वञ्चयामि सर्वथा । अपरं तीरं यदा प्राप्यते तदा भवान् स्वोद्दिष्टस्थलं गच्छतु । अहम् अपि मम मार्गम् अनुसरामि'' इति अवदत् जीतुः ।

एतस्मात् सन्तुष्टः अभवत् कूर्मः । जीतुः तं जले अस्थापयत् । कूर्मः प्लवनम् आरब्धवान् । जीतुः तस्य पृष्ठे उपाविशत् । अचिरात् एव ताभ्याम् अपरं तीरं प्राप्तम् ।

यदा कूर्मः नदीजले अदृश्यतां गतः तदा जीतुः अचिन्तयत् – 'कदाचित् वा अहम् एतस्य मांसस्य रुचेः आस्वादनं करिष्यामि एव' इति ।

श्वशुरगृहे महता सन्तोषेण कालं यापितवान् जीतुः । प्रियाणि भक्ष्याणि एव तेन प्राप्तानि तत्र । लवणमरीचिकासहिताः भृष्टाः मीनाः *'हरिया' 'महुवा'* च तेन प्राप्ताः । सः तस्य बान्धवाः च गानेन नृत्येन च समग्रां रात्रिम् महता सन्तोषेण यापितवन्तः । *'मन्देर'* वाद्यस्य *'लोहातिनगेरा'* वाद्यस्य च अनुगुणं भूरि नृत्यं कृतम् । कर्मीप्रभृतयः महिलाः *'नागरी'*-मृत्तिकया स्नात्वा आभरणानि च धृत्वा विराजमानाः आसन् ।

जीतोः प्रत्यागमनकालः सन्निहितः । तस्य पत्नी पुत्रः च उक्तवन्तौ यत् इतोऽपि किञ्चित्कालम् अत्र स्थास्यावः इति । अतः जीतुना एकाकिना एव प्रतिगन्तव्यम् आपतितम् । जीतुः आनन्देन पदानि स्थापयन् अधस्तनं श्लोकं गायति स्म –

ग्रीष्मे भवन्ति तरवो बहवश्च दग्धाः
तस्मात् त्यजन्ति सकला विहगा अरण्यम्
वर्षन्ति कृष्णजलदाः, तरवः फलन्ति
आयान्ति सर्वविहगा, वनमेति शोभाम् ।।

इति ।

यदा तेन नदीतीरं प्राप्तं तदा दृष्टं यत् प्रवाहवेगः इतोऽपि न उपशान्तः इति । इदानीं किं करणीयम् इति यावत् सः चिन्तयन् आसीत् तावता तेन सः एव कूर्मः दृष्टः, यश्च पूर्वं तम् एतत् तीरम् आनीतवान् आसीत् ।

''अये, मित्र ! अपि कुशलम् ? दैवनिर्णयः अतिविचित्रः । अतः एव आवाम् एवं पुनः पुनः मिलन्तौ स्वः । एवं ननु ?'' इति अपृच्छत् जीतुः ।

'एषः ध्वनिः कुत्रापि श्रुतपूर्वः इव भाति

खलु ?' इति चिन्तयन् कूर्मः तीरस्य दिशि दृष्टिं प्रसारितवान् । तत्र आसीत् जीतुः ।

''अये, भवान् !'' इति आश्चर्येण अवदत् कूर्मः ।

''आम्, अहं जीतुः । मां तत् तीरं प्रापयति खलु भवान् ?'' इति विश्वासेन अपृच्छत् जीतुः । कूर्मः सन्तोषेण एव एतत् कार्यम् अङ्गयकरोत् । ततः विना वचनं तयोः प्रयाणम् आरब्धं नद्याम् । यदा नदीमध्यं प्राप्तं तदा कूर्मः जीतुम् अपृच्छत् - ''किं चिन्तयन् अस्ति भवान् ?'' इति ।

'यः नद्यां स्थित्वा असत्यं वदति तस्य महत् अहितं भविष्यति' इति उत्कलमूल-जातीयानां विश्वासः आसीत् । अतः जीतुः स्वस्य मनसि स्थितं विचारम् अवदत् - ''अद्य अहं भवन्तं गृहं नीत्वा खादितुम् अर्हामि, यतः मया किमपि वचनं तु न दत्तम् इति चिन्तयन् आसम्'' इति ।

''भवन्तः मानवाः एवम् एव कृतघ्नताम् आचरन्ति इति अहं जानामि । भवान् एवम् एवह कुर्यात् इति निरीक्षितम् अपि आसीत् मया । तदस्तु, मया किं चिन्त्यते इति किं भवान् जानाति ?'' इति अपृच्छत् कूर्मः ।

''किं चिन्त्यते भवता ?'' - अपृच्छत् जीतुः ।

''अद्य अहं भवन्तं नद्यां पातयिष्यामि । अपरतीरं प्रापयिष्यामि एव इति मयापि वचनं न दत्तं खलु अद्य'' इति अवदत् कूर्मः ।

''मां मा पातयतु कृपया । अहं तरणम् अपि न जानामि'' इति दैन्येन अवदत् जीतुः ।

''यः मम मारणं चिन्तयति तं नद्यां पातयामि चेत् को दोषः ?'' इति अपृच्छत्

तेषां वृत्तयः

उत्कलमूलवासिनः वृत्त्या कृषिकाः प्राधान्येन । ते विविधसस्यानाम् औषधीय-गुणान् विषयुक्ततां च जानन्ति । मृगया तेषाम् अपरः प्रमुखः व्यापारः । केचन कृषिः मृगया चेति उभयम् अपि कुर्वन्ति ।

कूर्मः ।

तावता भीतेन जीतुना अपरतीरे शयानः शृगालः दृष्टः ।

''अयं विवादः आवाभ्यां परिहर्तुं न शक्यते । अतः तीरस्थं शृगालं निर्णायकं

तेषां विश्वासः

अन्यवन्यजातीयाः इव उत्कलमूलवासिनः अपि दैवे, भूतप्रेतादिषु च विश्वासवन्तः । तत्सम्बन्धिनः अनेके आचाराः सन्ति तेषाम् । तेषां विश्वासाः केचन -

★ यदि कश्चन मृगयाजीवी स्वप्ने स्वगृहं प्रति वध्वाः आगमनं पश्यति तर्हि सः हरिणस्य मारणे समर्थः भवति । यदि स्वप्ने कस्यचित् प्राणिनः मारणं दृश्यते तर्हि स्वप्नद्रष्टुः एव मरणं प्रायः सम्भवति ।

★ मृगयाजीवी यदि मार्गे रिक्तपात्रं वहन्तीं महिलां पश्यति तर्हि सः मृगयायाम् एकम् अपि प्राणिनं मारयितुं न शक्नोति । यदि सः पूर्णपात्रं वहन्तीं पश्यति तर्हि तत् नितरां शुभकरम् ।

★ शृगालं लक्ष्यीकृत्य गृहीतः बाणः, महिलया पादेन स्पृष्टः बाणः च लक्ष्य-स्पर्शने असमर्थः भवति ।



करवाम । सः यथा वदति तथा भवतु'' इति अवदत् जीतुः ।

''भवतु । भवान् मां खादितुम् अर्हति, उत अहं भवन्तं नद्यां पातयितुम् अर्हामि इति सः एव निर्णयतु'' इति अवदत् कूर्मः ।

तीरे शयानः शृगालः उभयोः सम्भाषणं सम्यक् श्रुत्वा विवादविषयं पूर्णतया अवगतवान् आसीत् ।

''शृगालमित्र ! भोः शृगालमित्र !'' इति जीतुः कूर्मः च उच्चैः आहूतवन्तौ । किन्तु शृगालः उत्कर्णः भूत्वा श्रवणार्थं प्रयत्नं कुर्वाणः अपि किमपि अश्रुतवान् इव अभिनयं कृतवान् । जीतुः पुनरपि उच्चैः शृगालम् आह्वयत् ।

''अहं किमपि न शृणोमि । किञ्चित् उच्चैः वदन्तु तावत्'' इति अवदत् शृगालः । कूर्मः विवादविषयम् ऊच्चस्वरेण न्यवेदयत् ।

''अहो, किञ्चिदपि न शृणोमि । न जाने मम कर्णयोः किं जातम् इति । किञ्चित् समीपम्

आगत्य वदन्तु तावत्'' इति अवदत् शृगालः ।

कूर्मः तीरसमीपम् आगत्य पुनरपि अवदत् विवादविषयम् ।

''उक्तं स्पष्टतया न ज्ञायते । इतोऽपि समीपम् आगच्छतु'' इति अवदत् शृगालः ।

अतः कूर्मः तीरम् एव स्पृष्टवान् इव । जीतुः शृगालं विवादविषयं वक्तुं मुखम् उद्घाटयितुम् उद्युक्तः ।

''मूर्ख ! आदौ तीरे पदं स्थापयतु'' इति आदिशत् शृगालः । जीतुः झटिति तीरे पदं स्थापयित्वा दीर्घं निःश्वसितवान् ।

''इतोऽपि किमर्थम् अत्र स्थीयते कूर्म-महाशय ! तस्य ग्रहणात् पूर्वं जले निमज्जतु रे'' इति कूर्मम् असूचयत् शृगालः । एतत् श्रुत्वा कूर्मः जले निमज्जन् ततः अदृश्यः अभवत् । चतुरः शृगालः सन्तोषेण स्वस्य वासस्थानम् अगच्छत् ।

केषाञ्चित् शब्दानाम् अर्थः

बस्ती - गृहाणां समूहरूपः वसतिप्रदेशः ।

छठी - शिशोः जन्मानन्तरं षष्ठे दिने क्रियमाणः कार्यक्रमः । तद्दिने 'भलुवा'-पर्णानाम् उपरि शिशु शाय्यते । पत्रस्थानि कण्टकानि शिशोः शरीरं विध्यन्ति । उत्कलमूलवासिनां विश्वासः यत् कण्टकानां वेधनतः शिशोः शरीरे रोग-निरोधकशक्तिः उत्पद्यते, येन च अग्रिमे जीवने रोगाः तं न बाधन्ते इति ।

सर्ग - सालवृक्षः ।

सर्णबर्हिया - उत्कलमूलवासिनां प्रमुखः आराध्यदेवः ।

हरिया - तण्डुलतः निर्मीयमाणः मद्यप्रकारः कश्चन, यश्च महतः मृत्पात्रस्य साहाय्येन निर्मीयते, समारम्भेषु वितीर्यते च ।

महुवा - 'महुवा'नामकानां पुष्पाणाम् उपयोगेन सज्जीक्रियमाणः अपरः मद्य-प्रकारः ।

मन्देर - 'गम्भार'नामकस्य वृक्षस्य प्रकाण्डम् उपयुज्य सज्जीक्रियमाणं वाद्यम् । मृत्तिकया अपि एतत् वाद्यं सज्जीक्रियते ।

लोहाटीनगेरा - अपरप्रकारकम् आतोद्य-वाद्यम् ।

'नागरी' मृत्तिका - एषा कृष्णवर्णीया । फेनकस्थाने एतस्याः उपयोगः क्रियते । एषा अतिमसृणा भवति । अतः केशानां शरीरस्य च स्वच्छतार्थम् एषा उपयुज्यते ।

पक्काः चणकाः कथम् अङ्कुरिताः स्युः ?

मासद्वयतः अजीजः प्रतिक्षणम् आकाशं पश्यति आशया - 'वृष्टिः भवेत् किम्' इति । एषः प्रश्नः न केवलं तस्य, अपि तु ग्रामे स्थितानां सर्वेषाम् अपि । 'कृषेः का गतिः ?' इति सर्वेषाम् आतङ्कः । किन्तु वृष्टिकारणेन वरुणदेवेन जनानां प्रार्थना न श्रुता एव इति भाति । ग्रामे सर्वेऽपि चिन्ताक्रान्ताः सन्ति ।

निर्धनस्य कृषिकस्य अजीजस्य तु दयनीया स्थितिः । तेन वर्धितानि सर्वाणि धान्यसस्यानि शुष्काणि जातानि सन्ति । भोजनार्थं किमपि नास्ति गृहे । उद्योगोऽपि न लभ्यते । अतः नगरं गत्वा उद्योगान्वेषणं करणीयम् इति निश्चित्य सः भूमिम् अल्पमूल्येन विक्रीतवान् । प्रस्थान-समये वणिजः मीरचन्दतः नव पक्कानि अण्डानि ऋणरूपेण प्राप्य प्रस्थितवान् सः ।

'एषः ऋणरूपेण एव एतानि अण्डानि नीतवान्, किन्तु तेषां धनं न प्रत्यागच्छेत् एव । यस्य गृहे वराटिकामात्रम् अपि धनं नास्ति सः



कथं वा ऋणं प्रत्यर्पयेत् ? गच्छतु नाम । नवानाम् अण्डानां मूल्यं न प्राप्तं चेत् अहं तु निर्धनः न भवामि । तेषां कारणतः कानिचन दिनानि सः यदि बुभुक्षां निवारयितुं शक्नुयात् तर्हि मया अपि पुण्यं प्राप्येत' इति चिन्तितवान् मीरचन्दः ।

अहो, दैवगतिः चित्रा । अकिञ्चनः सन् गृहात् निर्गतः अजीजः सप्तवर्षाभ्यन्तरे महा-धनिकः संवृत्तः । ग्रामम् आगतः सः सौधसदृशं गृहं क्रीतवान् । सञ्चारार्थम् अश्वशकटाः आगताः । अमूल्यानि वस्त्राणि धरति स्म सः । हस्तस्य सर्वासु अङ्गुलीषु सुवर्णाङ्गुलीयकानि ! विशाला कृषिभूमिः क्रीता तेन । फलवाटिका अपि क्रीता । तस्य ऐश्वर्यं दृष्ट्वा ग्रामीणाः दिग्भ्रान्ताः ।

मीरचन्दः ऋणरूपेण दत्तानि नव पक्कानि अण्डानि न विस्मृतवान् आसीत् । सः अजीजस्य प्रासादं गत्वा द्वारशब्दं कृतवान् । शुभ्रवस्त्रधारी कश्चन सेवकः द्वारम् उद्घाटित-वान् । ''अहम् अजीजेन मेलितुम् इच्छामि'' इति अवदत् मीरचन्दः ।

सेवकः अन्तः गमनाय मार्गं दर्शितवान् । अजीजः तं विनयेन स्वागतीकृतवान् । तं दृष्ट्वा मीरचन्दः अवदत् - ''अजीज ! सप्तभ्यः वर्षेभ्यः पूर्वं ग्रामत्यागावसरे मया नव अण्डानि दत्तानि भवते । तेषां मूल्यत्वेन सहस्रं सुवर्ण-नाणकानि दातव्यानि सन्ति भवता'' इति ।

''नवानाम् अण्डानां मूल्यं सहस्रं सुवर्ण-नाणकानि ! भवान् विनोदार्थं वदन् नास्ति खलु ? भवान् ऋणरूपेण तानि दत्तवान् इत्यतः

अहम् अधमर्णः अस्मि । तेषां योग्यं मूल्यं दातुम् इच्छामि अपि । किन्तु भवदुक्तं मूल्यं तु न अर्हन्ति तानि'' इति अवदत् अजीजः ।

''मया सहस्त्रं सुवर्णनाणकानि एव इष्यन्ते'' इति दृढस्वरेण अवदत् मीरचन्दः । किन्तु अजीजः तावत् मूल्यं दातुं न इष्टवान् । अतः मीरचन्दः व्यवहारं न्यायालयं नीतवान् ।

न्यायाधिकारी उभयोः अपि कथनं श्रुत्वा अवदत् - ''श्वः उभौ अपि आगच्छताम् । निर्णयं श्रावयिष्यामि'' इति ।

अनन्तरदिने अजीजः युक्ते समये न आगतः, प्रत्युत आगमने घण्टाद्वयात्मकं विलम्बं कृतवान् सः ।

यदा सः उपस्थितः तदा तं क्रोधेन पश्यन् मीरचन्दः न्यायाधीशम् अवदत् - ''मान्याः ! एषः ऐश्वर्यप्राप्तितः मां वञ्चितवान् । यदि तानि अण्डानि एतस्मै न दत्तवान् स्याम्, तानि च मत्समीपे एव स्थितानि स्युः तर्हि ततः शावकाः उत्पन्नाः स्युः । यदा उत्तमकुक्कुटयः भवेयुः तर्हि प्रभूतानि अण्डानि दद्युः । ततः उत्पन्नानि अण्डानि विक्रीय प्रायः दशसहस्राधिकानि सुवर्णनाणकानि प्राप्तवान् स्याम् । मया विपत्काले एतस्मै तानि दत्तानि । प्रतिफलरूपेण सुवर्णनाणकसहस्रमात्रं पृष्टम् । एषः तस्य दानं निराकृतवान् । अद्यापि धाष्टर्येन व्यवहरन् विलम्बेन उपस्थितः अस्ति'' इति ।

''भोः, विलम्बेन आगच्छता भवता न्यायालयव्यवहारे विघ्नः कल्पितः । कुतः अस्माभिः न दण्डनीयः भवान् ? विलम्बः किमर्थं कृतः ?'' इति अजीजम् अपृच्छत् न्यायाधीशः ।

''श्रीमन् ! विलम्बः कृतः यत् तदर्थं क्षन्तव्यः अहम् । अहं मम उद्याने व्यञ्जनम्

आरोपयन् आसम् । तदर्थं विलम्बः जातः'' इति विनयेन अवदत् अजीजः ।

''उद्याने व्यञ्जनस्य आरोपणम् ! किम् एतत् हास्यास्पदं वचनम् !!'' इति अवदत् न्यायाधीशः ।

''श्रीमन् ! मम गृहस्य पाचकः अद्य चणकैः व्यञ्जनं सज्जीकृतवान् आसीत् । व्यञ्जन-खादनसमये मम मनसि विचारः आगतः यत् व्यञ्जनं भूमौ स्थापितं चेत् चणकवाटिका निर्मातुं शक्या इति । तदेव कुर्वन् आसम् अहम्'' इति उक्तवान् अजीजः।

''रे मूर्ख ! व्यञ्जनस्थाः पक्काः चणकाः अङ्कुरिताः न भवन्ति इत्यपि किं न ज्ञायते भवता ? कीदृशः अविवेकी भवान् !!'' इति उपहासपूर्वकम् उक्तवान् न्यायाधीशः ।

''यदि मीरचन्दस्य पक्वेभ्यः अण्डेभ्यः शावकाः उत्पन्नाः भवेयुः तर्हि मम पक्वेभ्यः चणकेभ्यः कुतो वा अङ्कुराणि न उत्पद्येरन् ?'' इति पृष्टवान् अजीजः ।

मीरचन्दः निरुत्तरः जातः । न्यायाधीशः मन्दहासं प्रकटितवान् । अजीजस्यैव जयः जातः ।

पक्वाः चणकाः कथम् अङ्कुरिताः स्युः ?

मासद्वयतः अजीजः प्रतिक्षणम् आकाशं पश्यति आशया - 'वृष्टिः भवेत् किम्' इति । एषः प्रश्नः न केवलं तस्य, अपि तु ग्रामे स्थितानां सर्वेषाम् अपि । 'कृषेः का गतिः ?' इति सर्वेषाम् आतङ्कः । किन्तु वृष्टिकारणेन वरुणदेवेन जनानां प्रार्थना न श्रुता एव इति भाति । ग्रामे सर्वेऽपि चिन्ताक्रान्ताः सन्ति ।

निर्धनस्य कृषिकस्य अजीजस्य तु दयनीया स्थितिः । तेन वर्धितानि सर्वाणि धान्यसस्यानि शुष्काणि जातानि सन्ति । भोजनार्थं किमपि नास्ति गृहे । उद्योगोऽपि न लभ्यते । अतः नगरं गत्वा उद्योगान्वेषणं करणीयम् इति निश्चित्य सः भूमिम् अल्पमूल्येन विक्रीतवान् । प्रस्थान-समये वणिजः मीरचन्दतः नव पक्वानि अण्डानि ऋणरूपेण प्राप्य प्रस्थितवान् सः ।

'एषः ऋणरूपेण एव एतानि अण्डानि नीतवान्, किन्तु तेषां धनं न प्रत्यागच्छेत् एव । यस्य गृहे वराटिकामात्रम् अपि धनं नास्ति सः



कथं वा ऋणं प्रत्यर्पयेत् ? गच्छतु नाम । नवानाम् अण्डानां मूल्यं न प्राप्तं चेत् अहं तु निर्धनः न भवामि । तेषां कारणतः कानिचन दिनानि सः यदि बुभुक्षां निवारयितुं शक्नुयात् तर्हि मया अपि पुण्यं प्राप्येत' इति चिन्तितवान् मीरचन्दः ।

अहो, दैवगतिः चित्रा । अकिञ्चनः सन् गृहात् निर्गतः अजीजः सप्तवर्षाभ्यन्तरे महा-धनिकः संवृत्तः । ग्रामम् आगतः सः सौधसदृशं गृहं क्रीतवान् । सञ्चारार्थम् अश्वशकटाः आगताः । अमूल्यानि वस्त्राणि धरति स्म सः । हस्तस्य सर्वासु अङ्गुलीषु सुवर्णाङ्गुलीयकानि ! विशाला कृषिभूमिः क्रीता तेन । फलवाटिका अपि क्रीता । तस्य ऐश्वर्यं दृष्ट्वा ग्रामीणाः दिग्भ्रान्ताः ।

मीरचन्दः ऋणरूपेण दत्तानि नव पक्वानि अण्डानि न विस्मृतवान् आसीत् । सः अजीजस्य प्रासादं गत्वा द्वारशब्दं कृतवान् । शुभ्रवस्त्रधारी कश्चन सेवकः द्वारम् उद्घाटित-वान् । ''अहम् अजीजेन मेलितुम् इच्छामि'' इति अवदत् मीरचन्दः ।

सेवकः अन्तः गमनाय मार्गं दर्शितवान् । अजीजः तं विनयेन स्वागतीकृतवान् । तं दृष्ट्वा मीरचन्दः अवदत् - ''अजीज ! सप्तभ्यः वर्षेभ्यः पूर्वं ग्रामत्यागावसरे मया नव अण्डानि दत्तानि भवते । तेषां मूल्यत्वेन सहस्रं सुवर्ण-नाणकानि दातव्यानि सन्ति भवता'' इति ।

''नवानाम् अण्डानां मूल्यं सहस्रं सुवर्ण-नाणकानि ! भवान् विनोदार्थं वदन् नास्ति खलु ? भवान् ऋणरूपेण तानि दत्तवान् इत्यतः

अहम् अधमर्णः अस्मि । तेषां योग्यं मूल्यं दातुम् इच्छामि अपि । किन्तु भवदुक्तं मूल्यं तु न अर्हन्ति तानि'' इति अवदत् अजीजः ।

''मया सहस्रं सुवर्णनाणकानि एव इष्यन्ते'' इति दृढस्वरेण अवदत् मीरचन्दः । किन्तु अजीजः तावत् मूल्यं दातुं न इष्टवान् । अतः मीरचन्दः व्यवहारं न्यायालयं नीतवान् ।

न्यायाधिकारी उभयोः अपि कथनं श्रुत्वा अवदत् - ''श्वः उभौ अपि आगच्छताम् । निर्णयं श्रावयिष्यामि'' इति ।

अनन्तरदिने अजीजः युक्ते समये न आगतः, प्रत्युत आगमने घण्टाद्वयात्मकं विलम्बं कृतवान् सः ।

यदा सः उपस्थितः तदा तं क्रोधेन पश्यन् मीरचन्दः न्यायाधीशम् अवदत् - ''मान्याः ! एषः ऐश्वर्यप्राप्तितः मां वञ्चितवान् । यदि तानि अण्डानि एतस्मै न दत्तवान् स्याम्, तानि च मत्समीपे एव स्थितानि स्युः तर्हि ततः शावकाः उत्पन्नाः स्युः । यदा उत्तमकुक्कुट्यः भवेयुः तर्हि प्रभूतानि अण्डानि दद्युः । ततः उत्पन्नानि अण्डानि विक्रीय प्रायः दशसहस्राधिकानि सुवर्णनाणकानि प्राप्तवान् स्याम् । मया विपत्काले एतस्मै तानि दत्तानि । प्रतिफलरूपेण सुवर्णनाणकसहस्रमात्रं पृष्टम् । एषः तस्य दानं निराकृतवान् । अद्यापि धाष्ट्र्येन व्यवहरन् विलम्बेन उपस्थितः अस्ति'' इति ।

''भोः, विलम्बेन आगच्छता भवता न्यायालयव्यवहारे विघ्नः कल्पितः । कुतः अस्माभिः न दण्डनीयः भवान् ? विलम्बः किमर्थं कृतः ?'' इति अजीजम् अपृच्छत् न्यायाधीशः ।

''श्रीमन् ! विलम्बः कृतः यत् तदर्थं क्षन्तव्यः अहम् । अहं मम उद्याने व्यञ्जनम्

आरोपयन् आसम् । तदर्थं विलम्बः जातः'' इति विनयेन अवदत् अजीजः ।

''उद्याने व्यञ्जनस्य आरोपणम् ! किम् एतत् हास्यास्पदं वचनम् !!'' इति अवदत् न्यायाधीशः ।

''श्रीमन् ! मम गृहस्य पाचकः अद्य चणकैः व्यञ्जनं सज्जीकृतवान् आसीत् । व्यञ्जन-खादनसमये मम मनसि विचारः आगतः यत् व्यञ्जनं भूमौ स्थापितं चेत् चणकवाटिका निर्मातुं शक्या इति । तदेव कुर्वन् आसम् अहम्'' इति उक्तवान् अजीजः।

''रे मूर्ख ! व्यञ्जनस्थाः पक्वाः चणकाः अङ्कुरिताः न भवन्ति इत्यपि किं न ज्ञायते भवता ? कीदृशः अविवेकी भवान् !!'' इति उपहासपूर्वकम् उक्तवान् न्यायाधीशः ।

''यदि मीरचन्दस्य पक्वेभ्यः अण्डेभ्यः शावकाः उत्पन्नाः भवेयुः तर्हि मम पक्वेभ्यः चणकेभ्यः कुतो वा अङ्कुराणि न उत्पद्येरन् ?'' इति पृष्टवान् अजीजः ।

मीरचन्दः निरुत्तरः जातः । न्यायाधीशः मन्दहासं प्रकटितवान् । अजीजस्यैव जयः जातः ।

वार्ताविशेषाः

भूगोलस्य वयः
१२,५००,०००,०० वर्षाणि

एतस्य भूगोलस्य वयः एतावत् स्यात् इति विज्ञानिनः अभिप्रयन्ति । ते कथम् एतं निर्णयं कृतवन्तः इति ज्ञातुं भवतां कुतूहलम् अस्ति खलु ? संशोधकाः अतिप्राचीननक्षत्रे दृश्यमानं सजीवयुरेनियम्द्रव्यम् अवलम्ब्य स्वपरीक्षां कृतवन्तः । तैः 'रेडियेक्टिव् कास्मो क्रोनोमेट्रि' इत्येतत् आधुनिकं तन्त्रज्ञानम् उपयुक्तम् एतदर्थम् । एतत् तन्त्रज्ञानम् उत्कृष्टं दोषरहितं च इति अभिप्रयन्ति ते । तैः परीक्षार्थं स्वीकृतं नक्षत्रं - सि.एस्.३१०८२-००१ नामकम् । दक्षिणामेरिकायां चैल्प्रदेशे पेरनल् इत्यत्र स्थापितं बृहत् दूरदर्शकम् उपयुक्तं तैः एतदर्थम् । एतस्मिन् नक्षत्रे स्थितं युरेनियंद्रव्यं भूगोलस्य वयसः अभ्यूहे उपकारकं जातम् ।

मङ्गलग्रहे जीविसद्भावः

हङ्गरीदेशीयाः विज्ञानिनः वदन्ति यत् मङ्गलग्रहे जीविनः सन्ति इत्यत्र स्पष्टप्रमाणानि सन्ति इति । ते उपग्रहसाहाय्येन विविधकोणेभ्यः स्वीकृतानि ६०,००० भावचित्राणि सूक्ष्मेक्षिकया परिशीलितवन्तः । ततः तैः सहस्राधिकानि पादचिह्नानि परिलक्षितानि । तानि हिममय्यां भूमौ स्पष्टतया दृष्टिगोचराणि भवन्ति स्म ।

'अमेरिका'शब्दस्य प्रथमप्रयोगः

क्रिस्टफर् कोलम्बसः १४९२ तमे वर्षे सेन् सल्वडार्नामकम् अमेरिकीयं तीरं प्राप्तवान् इति सर्वे जानन्ति एव । किन्तु 'अमेरिका'शब्दस्य प्रथमप्रयोगः कदा अभवत् इति किं भवन्तः जानन्ति ? १९०१-०२ तमे वर्षे वासपुक्कि एतं भूखण्डं प्राप्य एतस्य पार्थक्येन स्थितिं लक्षितवान् । ततः मार्टिन् म्यूलरनामकः एतं भूखण्डम् 'अमेरिका' इति निर्दिष्टवान् । एतादृशोल्लेखयुतस्य मानचित्रस्य प्रतिकृतयः न उपलभ्यन्ते । अद्वितीया एषा प्रतिकृतिः अमेरिकीयेन 'लैब्ररी आफ् कांग्रेस्' नामकेन ग्रन्थालयेन १०,०००,००० डालराणि दत्त्वा क्रीता अस्ति ।

भाग्यपत्रात् प्राप्तं सौभाग्यम्

जर्मनीदेशीये फ्राङ्कफर्ट्नगरे वसन्ती पञ्चशत्-वर्षीया काचित् वृद्धा आहारखण्डस्य क्रयणस्य चिन्तनं परित्यज्य सप्टम्बर्मासस्य प्रथमे दिनाङ्के एकं भाग्यपत्रं क्रीतवती । तद्बलात् १०,०००,००० अमेरिकन्-डालरात्मकं पुरस्कारं च प्राप्तवती । सा कदापि भाग्यपत्रादिक्रयणे न आसक्ता । एकदा स्वस्य आर्थिकदुस्स्थितिं दृष्ट्वा नितरां खिन्ना सा भाग्यपरीक्षार्थं भाग्यपत्रं क्रीतवती । ताम् अनुसरन्तः यदि भवन्तः अपि भाग्यपत्रं क्रीणीयुः तर्हि अनुकम्पापात्राणि भवेयुः !!

भारतम् अवगम्यताम्

प्रश्नोत्तरम्

एतस्मिन् मासे मिश्रप्रश्नाः सन्ति । कियतां प्रश्नानाम् उत्तराणि वक्तुं शक्नुयुः भवन्तः ? प्रयत्नम् आरभन्ताम् ।

१. कस्मिन् दिनाङ्के भारतस्य जनसङ्ख्या शतकोटित्वं प्राप्तवती ?

२. प्रपञ्चस्य अत्युन्नतं शिखरम् 'एवरेस्ट्' नेपाल-टिबेट्-सीमायाम् अस्ति । भारतस्य अत्युन्नतं शिखरं किम् ? तस्य औन्नत्यं च कियत् ?

३. पञ्चानां नदीनां कारणतः 'पञ्जाब' इति नाम आगतम् । ताः पञ्च नद्यः काः ?

४. गतवर्षे रूपितानि त्रीणि नूतनराज्यानि कानि ? तेषां नाम, तेषां राजधानीनां नाम च किम् ?

५. स्वातन्त्र्यप्राप्तेः अनन्तरं केनचित् राज्येन उभे मुख्यमन्त्रिण्यौ दृष्टे । तस्य राज्यस्य नाम किम् ? तयोः मुख्यमन्त्रिण्योश्च नाम किम् ?

'अक्टोबर्'मासस्य प्रश्नानाम् उत्तराणि

१. ओणम् । एषः उत्सवः केरले आचर्यते । विष्णोः पञ्चमावतारभूतेन वामनेन पातालं प्रेषितः राजा महाबली वार्षिकदर्शनार्थं भूमिम् आगच्छति यत् तत् निमित्तीकृत्य एतत् आचर्यते ।

२. दीपावली । नवम्बर्मासस्य १४ दिनाङ्के ।

३. विद्याधिदेवतायाः सरस्वत्याः निमित्तम् आचर्यमाणस्य नवरात्रोत्सवस्य अन्तिमे दिने विजयदशम्याम् । बङ्गालीयाः वसन्तपञ्चमीदिने सरस्वतीपूजां कुर्वन्ति ।

४. रक्षाबन्धनोत्सवः भ्रातृद्वितीया च ।

६. खेरवाद साल् इति । एतत् झरतुष्ट्रस्य जन्मदिनम् ।

७. येसुक्रिस्तस्य शूलारोपानन्तरं यत् पुनरुज्जीवनं जातं तत् निमित्तीकृत्य ईस्टर् आचर्यते ।

८. बुद्धः एतस्मिन् एव दिने जन्म प्राप्तवान् । ज्ञानोदयः अपि जातः एतस्मिन् दिने एव । निर्वाणम् अपि एतस्मिन् एव दिने जातम् ।

९. पोङ्गल्दिने ।

१०. शबरिमलैनामके पर्वते स्थिते अय्यप्पदेवालये भक्ताः कांश्चन क्षणान् यावत् आकाशे दिव्यप्रभां द्रष्टुं शक्नुवन्ति ।

'नवम्बर्'मासीयप्रश्नानाम् उत्तराणि

१. ध्रुवः । पिता उत्तानपादः ।

२. मार्कण्डेयः । मृकण्डुः इति ।

३. प्रह्लादः । संरक्षकः भगवान् विष्णुः ।

४. नचिकेताः । पिता वाजश्रवाः ।

५. एकलव्यः । कौरवाः पाण्डवाश्च ।

६. भरतः । पिता दुष्यन्तः ।

भारत-गौरव-गाथा

महासंस्कृत्याः स्थूलदर्शनम्, प्रतियुगं सत्यान्वेषणार्थं कृताः विशेषयत्नाः

२२. सीतायाः अज्ञातम् अन्यत् मुखम्

‘‘चमेलीम् अधिकृत्य सन्दीपः यत् उच्चैः हसन् आसीत् तत् देवनाथवर्यम् आश्चर्यचकितम् अकरोत् । एतादृशेन उच्चस्वरेण सन्दीपेन कृतम् हासम् इतःपूर्वं न दृष्टवान् आसीत् सः ।

दिनपत्रिकां हस्तेन गृहीत्वा स्वागतप्रकोष्ठम् आगतवान् सः । तस्मिन् एव समये तस्य स्नुषा जयश्रीः अपि अन्यप्रकोष्ठतः तत्र आगतवती । ‘‘दुष्टाः एते । अन्यस्य शान्तेः भङ्गः भवति इत्यपि न चिन्तयन्ति ते’’ इति उक्तवती सा । देवनाथवर्यस्य विश्रान्तिभङ्गं कृतवन्तौ बालौ इति तस्याः आतङ्कः आसीत् ।

किन्तु देवनाथवर्यः मध्याह्नभोजनोत्तरं लघुनिद्रां समाप्य पत्रिकां पठन् आसीत् इति यदा तया ज्ञातं तदा तस्याः चिन्ता किञ्चिदिव अपगता अभवत् ।

‘‘किम् अहं भवतः निमित्तं चायं प्रकोष्ठं प्रति एव आनयानि ?’’ इति देवनाथवर्यं पृष्टवती जयश्रीः ।

‘‘अस्तु ! किन्तु आदौ वयं सन्दीपस्य महाहासस्य कारणं जानीयाम’’ इति मन्दहास-पूर्वकम् उक्तवान् देवनाथवर्यः । ततः तौ बालयोः समीपं गत्वा हासस्य कारणं पृष्टवन्तौ ।

अनुवर्तमाना कथामाला



''तात ! यदि अहं बीजिङ्गनगरे प्रवर्तिष्यमाणायाम् ओलम्पिक्स्पर्धायां भारतीयगणस्य नायकः स्यां तर्हि भवान् किं वदेत् ? भवान् अपि उच्चैः हसेत् एव ननु ?'' इति पृष्टवान् सन्दीपः ।

''न हसेयम् अपि ! अहम् अपि आत्मानं राष्ट्रियमुष्टियुद्धकोविदेषु प्रथमस्थानं प्राप्तवन्तं घोषयेयम्'' इति हसन् एव उक्तवान् देवनाथवर्यः ।

''युद्धे यदि भवतः आसक्तिः अस्ति तर्हि चमेल्याः गणे नानासाहेबस्य पात्रं भवान् एव निर्वहतु । सा तु लक्ष्मीबाय्याः पात्रं निर्वक्ष्यति । विद्यालयस्य स्वर्णजयन्तीकार्यक्रमस्य निमित्तम् आयोक्ष्यमाने 'झान्सीराणी'नाटके एषा एव लक्ष्मीबायीपात्रं निर्वहति । धीरा दृढमनस्का युद्धनिपुणा सा क्व । कोमलचित्ता एषा क्व ! एषा तु सीतापात्रं निर्वोढुं योग्या, न तु झान्सीराज्ञ्याः लक्ष्मीबाय्याः पात्रम्'' इति उक्तवान् सन्दीपः ।

''चमेली लक्ष्मीबायीपात्रं निर्वहति यत् तत्र अहं तु अनौचित्यं न पश्यामि । वस्तुतस्तु लक्ष्मीबायी अपि लज्जाशीला, कोमलकाया, मृदुहृदया चैव आसीत् । किन्तु यदा तादृशी परिस्थितिः आयाता तदा प्रबलम् आंग्लसेनापतिम् अपि सम्मुखीकुर्वती सा धैर्यस्य राष्ट्रभक्तेः च उदाहरणभूता जाता । तदस्तु, सीता भीरुशीला इति कथं वक्तुं शक्या ?'' इति अपृच्छत् देवनाथवर्यः ।

''सीता सर्वदा भीरुस्वभावा, लज्जाशीला, दौर्भाग्यपीडिता चैव परिलक्ष्यते खलु समग्रे रामायणे ? ततः तथा उच्यते'' इति उक्तवती जयश्रीः ।

''आम् ! एतत् सत्यम् एव खलु ?'' इति पृष्टवान् सन्दीपोऽपि ।

''किं सत्यं, किं मिथ्या इति वयं किञ्चित् चिन्तयाम तावत् । उपविशतु । अहं सीताविषये कांश्चन प्रश्नान् पृच्छामि । तदनन्तरं भवान् स्वाभिप्रायस्य युक्तायुक्ततां निर्णेतुम् अभिप्रायपरिवर्तनं कर्तुं वा स्वतन्त्रः एव । रामेण अरण्यं गन्तव्यम् इति कैकेय्या अपेक्षा कृता आसीत्, न तु सीतया अपि गन्तव्यम् इति । एवं ननु ?'' इति पृष्टवान् देवनाथवर्यः ।

''आम् ! कथायां तथैव श्रूयते'' इति उक्तवती जयश्रीः ।

तावता उभौ अपि बालौ आसने उपविष्टौ आस्ताम् ।

''अरण्यं गन्तव्यम् इति केन वा सीता आदिष्टा ? ज्येष्ठैः निषिध्यमाना अपि सा अरण्यगमनं सङ्कल्पितवती । किम् एतत् तस्याः दृढसङ्कल्पशक्तिं न द्योतयति ?''

देवनाथवर्यः प्रतीक्षितवान् - कस्यापि मुखात् किमपि वचनम् आगच्छेत् किम् इति । किन्तु कोऽपि किमपि न उक्तवान् ।

जयश्रीः तु मूलरामायणम् एव समग्रतया पठितवती आसीत् । चमेलीसन्दीपौ रामायण-सङ्ग्रहं पठितवन्तौ आस्ताम् । एवं त्रयः अपि समग्रां रामायणकथां तु सम्यक् जानन्ति स्म एव ।

देवनाथवर्यः कथनम् अनुवर्तितवान् - ''सीतायाः जीवनघटनां वस्तुनिष्ठदृष्ट्या सकृत् परिशीलयाम । सुवर्णमृगः आवश्यकः एव इति उक्त्वा अरण्ये सीता रामं प्रेषितवती । यदा मायामयः असुरः रामस्य ध्वनिम् अनुकुर्वन् आक्रन्दनं कृतवान् तदा सीता लक्ष्मणं बलात् प्रेषितवती - मया एकाकितया स्थातव्यं भवति इति जानती अपि । लक्ष्मणस्य सूचनाम् अपि धिक्कृत्य भिक्षादानाय लक्ष्मणरेखाम् अतिक्रम्य अपि गतवती, राक्षसराजेन गृहीता अभवत् च । एतासु सर्वासु घटनासु भीरुता कुत्र दृश्यते ?

एताः सर्वाः घटनाः दृष्ट्वा अपि किं वयं तां भीरुं कथयितुम् अर्हाम ? अत्र सर्वत्र किं तस्याः सङ्कल्पदृढता न दृश्यते ? सा परिस्थित्यधीना न आसीत् इति तु स्पष्टं खलु ?''

''मया एतया दृष्ट्या एताः घटनाः



अद्यावधि न परिशीलिताः एव'' इति उक्तवती जयश्रीः ।

''अम्ब ! धन्यवादाः भवत्यै । ज्येष्ठा प्राज्ञा भवती एव एतया दृष्ट्या न चिन्तितवती इति स्थिते पितामहः पामरान् अस्मान् कथं वा निन्देत् ?'' इति मन्दहासपूर्वकम् उक्तवान् सन्दीपः ।

देवनाथवर्यः अर्धनिमीलितनेत्रः स्वस्य कथनम् अनुवर्तितवान् - ''हनुमान् अशोकवने सीतां दृष्ट्वा उक्तवान् यत् समुद्रं तारयित्वा भवतीं रामसमीपं नेष्यामि इति । किन्तु सीतया एतत् दृढस्वरेण निराकृतम् । 'रावणः मां चौर्येण आनीतवान् । रामदूतः भवान् अपि यदि मां चौर्येण नयेत् तर्हि रामरावणयोः कः भेदः अवशिष्टः ? रामः रावणं जित्वा मां नयेत् । तदेव युक्तम्' इति उक्तवती सा । किम् एषा

घटना तस्याः भीरुतां प्रमाणीकरोति ? दृढचित्ततां दर्शयन्ती सा हनूमतः निरपायतां चिन्तितवती । यदा युद्धं समाप्तं तदा अपि अग्निपरीक्षां सा स्वयम् एव चिन्तितवती, न तु रामेण अन्येन वा आज्ञप्ता । एवं सर्वत्रापि सा स्वस्य इच्छायाः अनुगुणम् एव व्यवहृतवती । यत् सा युक्तम् अमन्यत तदेव कृतवती सा ।''

एतावत् उक्त्वा देवनाथवर्यः मौनम् आश्रितवान् । तम् अनुसरन्तः अन्येऽपि मौनेन एव आसन् । तदा चमेली तस्य हस्तात् रिक्तं चायचषकं स्वीकुर्वती प्रश्नं कृतवती – ''तात ! रामायणस्य अन्ते सा अपराम् अग्निपरीक्षाम् अनङ्गीकुर्वती किमर्थं भूमौ विलीना जाता ?'' इति ।

''उत्तमः प्रश्नः अयम् । प्रथमा अग्निपरीक्षा तया स्वयम् एव इष्टा आसीत् । किन्तु द्वितीयवारम् अग्निपरीक्षा भवतु इति अन्ये अपेक्षां कृतवन्तः । जनसमूहस्य पुरतः अग्निं प्रविश्य स्वस्य परिशुद्धतां सा प्रमाणीकरोतु इति ते इष्टवन्तः । एतत् तस्याः सम्मतं न आसीत् । अतः सा भूमिं प्रविष्टवती । भूमिः एव तस्याः माता इति भवन्तः जानीयुः एव खलु ?

दुष्टशक्तेः दुराचारस्य च प्रतीकभूतस्य रावणस्य संहारार्थं रामः प्रेरणीयः आसीत् तया । तत् कर्तव्यं तया सम्यक् कृतम् । अतः सा इतः परं करणीयं किमपि नास्ति इत्यतः भूमिं प्रविष्टवती । उत्तमशासनं कीदृशं भवेत् इति रामेण जगतः पुरतः स्वव्यवहारेण उदाहरणम् उपस्थापनीयम् आसीत् । रामावतारस्य उद्देशः न सिद्धः आसीत् । अतः स्वकर्तव्ये निरतः भवितुं रामाय अवकाशं दत्त्वा स्वस्य कर्तव्यं समाप्य भूमिं प्रविष्टवती सा ।

अन्यच्च, श्रीरामपट्टाभिषेकपर्यन्तः भागः एव वाल्मीकिना रचितः, तदनन्तरभागः तन्नाम उत्तररामायणं, केनापि समर्थेन कविना रचितम् इति वादोऽपि श्रूयते । एतदपि अत्र स्मर्तव्यम् अस्माभिः'' इति वदन् देवनाथवर्यः स्वस्य कथनं समापितवान् ।



देवीभागवतम्

शुकः यदा विवाहं सुदृढतया निराकृतवान् तदा व्यासः आत्मना रचितं देवीभागवतं श्रावितवान् ।

विष्णुः वटपत्रे शयानः आसीत् । सः चिन्तनम् आरब्धवान् – 'अहम् अत्र किमर्थं बालकरूपेण अस्मि ? कः मां सृष्टवान् ? एतस्य उत्तरं मया कथं ज्ञायते ?' इति ।

विष्णोः एतां स्थितिं दृष्टवत्याः देव्याः हृदये करुणा उत्पन्ना । अतः सा श्लोकार्धं श्रावितवती । तस्य अर्थः तु एवम् – 'अत्रैव सर्वम् अस्ति । एतत् ज्ञातं चेत् आत्मा अपि ज्ञातः इव' इति ।

विष्णुः एतत् श्लोकार्धं श्रुतवान् । किन्तु तस्य तात्पर्यं न अवगतं तेन ।

सः तत् श्लोकार्धं पुनः पुनः पठितवान् । तदा महादेवी विष्णोः पुरतः प्रत्यक्षा जाता । तस्याः हस्ते शङ्खचक्रगदादयः आसन् । सा स्वर्णमयानि वस्त्राणि धृतवती आसीत् ।

महादेवीं दृष्ट्वा विष्णुः दिग्भ्रान्तः । तस्य मुखात् किमपि वचनं न निर्गतम् । तदा देवी तम् उक्तवती – ''मायाकारणतः भवान् मां विस्मृतवान् अस्ति । इदानीं भवान् अस्ति सगुणः । अहम् अस्मि सत्त्वशक्तिः । भवतः नाभिकमले ब्रह्मणः जन्म भविष्यति । सः रजोगुणोपेतः सन् लोकान् स्रक्ष्यति । तां सृष्टिं भवान् पालयिष्यति । ब्रह्मदेवस्य भ्रूतः क्रोधकारणतः रुद्रस्य जन्म भविष्यति । सः घोरतपस्यां करिष्यति । तस्य परिणामतः सः सगुणः भविष्यति । प्रलयकाले ब्रह्मणा सृष्टं प्रपञ्चं सः नाशयिष्यति साकल्येन । मम साहाय्येन भवान् प्रपञ्चस्य पालनपोषणादिकं करिष्यति । मां सत्त्वरूपिणीम् अभिजानातु

भवान् । अहं सदा भवतः वक्षःस्थले एव वासं करिष्यामि'' इति ।

तदा विष्णुः महादेवीम् अवदत् - ''मया किञ्चन श्लोकार्धं श्रुतम् । तत् कथं श्रुतं मया ? कृपया वदतु'' इति ।

''भवान् सगुणरूपेण मां पश्यन् अस्ति । निर्गुणसत्त्वरूपिण्या मया एव स च श्लोकः श्रावितः । भगवन्मन्त्रस्य एतस्य पठनतः मङ्गलं भविष्यति'' इति उक्तवती देवी ।

विष्णुः तस्य मन्त्रस्य बलात् एव मधुकैटभौ मारितवान् । शरणागतं ब्रह्माणं तं मन्त्रम् उपदिष्टवान् सः । ब्रह्मा नारदं, नारदः व्यासं च तम् उपदिष्टवान् । व्यासः शुकम् एतम् उपदिशन् उक्तवान् - 'विभिन्नसंहितासु मया एतस्य विस्तृतरचना कृता अस्ति'' इति ।

शौनकादिमुनयः शुकस्य कथायाः श्रवणस्य अनन्तरं सूतम् अभ्यर्थितवतः 'यत् देवीभागवतं श्रावयतु इति । तदा सूतः कथाम् आरब्धवान् -

अयोध्या कोसलराज्यस्य राजधानी । ध्रुवसन्धिः नाम राजा तं देशं पालयति स्म । तस्य उभे पत्न्यौ - मनोरमा लीलावती चेति । मनोरमायाः पुत्रः सुदर्शनः । लीलावत्याः पुत्रस्य नाम शत्रुजित् इति । ध्रुवसन्धिः यदा मृगयार्थं गतः आसीत् तदा कस्यचित् सिंहस्य तस्य च युद्धं प्रवृत्तम् । तत्र उभौ अपि दिवं गतौ ।

मनोरमायाः पिता वीरसेनः कलिङ्गदेशस्य राजा आसीत् । जामातुः मरणवार्तां श्रुत्वा दिग्भ्रान्तः सः दौहित्रस्य सुदर्शनस्य दर्शनार्थम् अयोध्याम् आगतवान् । एवम् एव उज्जयिनीतः शत्रुजितः मातामहः युधाजिदपि आगतः ।

सुदर्शनः राजा भवेत् उत शत्रुजित् इत्येषः अंशः अनिर्णीतः आसीत् । उभे अपि मातरौ इच्छतः स्म - 'मम पुत्रः एव राजा भवेत्' इति । तयोः पितरौ पुत्र्याः पक्षं समर्थितवन्तौ । अतः पक्षद्वये शत्रुभावः उत्पन्नः । अन्ते उभयोः अपि पक्षयोः सङ्घर्षः जातः । एतस्मिन् सङ्घर्षे युधाजित् वीरसेनं मारितवान् ।

मनोरमा बालकेन सुदर्शनेन सह भरद्वाजाश्रमं गतवती । भरद्वाजः तयोः स्वागतं कृतवान् । शत्रुभ्यः तौ रक्षितवान् च । सुदर्शनस्य विद्याभ्यासव्यवस्था तेन कारिता । यदा सुदर्शनः प्राप्तवयस्कः जातः तदा महादेवी तस्य पुरतः प्रत्यक्षीभूय तस्मै अस्त्रविद्यां दत्तवती ।

शशिकला काशीराजस्य सुबाहोः पुत्री । सौन्दर्यखनी सा । एतत् जानन् सुदर्शनः तां

परिणेतुम् इष्टवान् । शशिकला अपि सुदर्शनं परिणेतुम् इच्छति स्म ।

सुबाहुः स्वपुत्र्याः स्वयंवरम् उद्घोषितवान् । विभिन्नदेशेभ्यः राजानः काशीम् आगताः । किन्तु शशिकला उक्तवती यत् ऋते सुदर्शनात्, अन्यं कमपि न परिणेष्यामि इति ।

तदा राज्ञी पुत्रीम् उक्तवती – ''भवत्याः वैवाहिकसम्बन्धम् इच्छन्तः बहवः राजानः अत्र आगताः सन्ति । एतादृशे अवसरे भवत्याः वचनं कथं सङ्गच्छेत ? एतस्मात् वयं विपत्तिग्रस्ताः स्याम । बहवः राजानः अस्माकं शत्रवः भवेयुः । युद्धं प्रवर्तेत । तदा अस्माकं विनाशः अपि सम्भवेत्'' इति ।

किन्तु शशिकला अन्यराजकुमारस्य परिणयप्रस्तावं सर्वथा निराकृतवती । सा पितरं स्पष्टोक्त्या उक्तवती – ''भवान् एतेभ्यः राजकुमारेभ्यः बिभ्यति । अतः एवं करोतु । सुदर्शनाय मां दत्त्वा विवाहं निर्वर्त्य रथे उपवेश्य राज्यतः बहिः प्रेषयतु । तदनन्तरं यदि युद्धं भवेत् तर्हि आवां शत्रून् संहरिष्यावः'' इति ।

''वत्से ! बहूनां विरोधः न शोभते । सर्वैः राजाभिः सह युद्धं लीलाविषयः न । वयं भवन्तौ रथे उपवेश्य राज्यसीमातः बहिः प्रेषयेम चेदपि किं ते दुष्टाः भवन्तौ आक्रम्य न नाशयेयुः ? तादृशे अवसरे भवन्तौ किं वा कर्तुं शक्नुयाताम् ? एतस्य क्लेशस्य परिहारार्थम् एकः एव उपायः – सीतायाः स्वयंवरे इव कापि परीक्षा व्यवस्थापनीया इति । तस्यां यः जयं प्राप्नोति सः परिणेतव्यः भवत्या'' इति अवदत् राजा ।

''किम् एतेन समस्यापरिहारः भवेत् ?

स्पर्धायां यः जयति तम् अहं परिणेष्यामि चेत् किम् अन्ये राजानः तूष्णीं तिष्ठेयुः ? तदापि युद्धं स्यादेव । अतः महादेव्यां विश्वस्य सुदर्शनाय मां दत्त्वा विवाहं निर्वर्तयतु'' इति शशिकला उक्तवती । पुत्र्याः निर्णयम् अङ्गीकृतवान् राजा सुबाहुः ।

सः रहसि पुत्र्याः विवाहस्य सन्नाहम् आरब्धवान् । सः सुदर्शनम् आहूय शास्त्रोक्त-विधिना कन्यादानं कृतवान् । ततः जामात्रे द्विशतं रथान्, सहस्रम् अश्वान्, सहस्रशः पदातीन्, अमूल्यानि वस्तूनि च उपायनरूपेण दत्तवान् । अनन्तरं सः मनोरमाम् उक्तवान् – ''इतःपरं मम पुत्री भवत्याः पुत्रस्य अधीना । तां प्रेम्णा पश्यतु इति मम प्रार्थना'' इति ।

सन्तुष्टा मनोरमा अवदत् – ''राज्य-विहीनाय अपि मम पुत्राय स्वपुत्रीं यच्छता भवता महान् एव उपकारः कृतः । भवादृशः



उत्तम पुरुषः नितरां विरलः । भवतः पुत्री इतःपरं ममापि पुत्री इव । किन्तु अस्माकं सर्वेषां रक्षणदायित्वं भवतः'' इति ।

तदा सुबाहुः अवदत् - ''भवत्याः पुत्रः राज्यविहीनः कथं भवेत् ? मम समग्रं राज्यं, सकलम् ऐश्वर्यं च तदधीनम् एव । जगदम्बा यावत् अस्माकं रक्षिकात्वेन तिष्ठति तावत् भीतिः किमर्थम् ?'' इति ।

''अहो, श्रवणरमणीयानि वचनानि भवतः । शुभमस्तु भवतः । भवान् स्वस्य राज्यं पालयतु । यदि जगदम्बायाः कृपा स्यात् तर्हि मम पुत्रः तदीयं पैतृकं राज्यं प्रतिप्राप्नुयात् कदाचित् । यदि दैवानुग्रहः स्यात् तर्हि स्पृष्टा मृत्तिका अपि सुवर्णायेत । मम पुत्रस्य भाग्यचक्रम् इदानीम् उत्तमम् अस्ति । अतः तस्य अहितं किमपि न भविष्यति'' इति उक्तवती मनोरमा ।

एवं सुबाहुः रहसि विवाहं निर्वर्त्य पुत्री-जामातरौ यदा प्रेषयितुम् उद्युक्तः तदा केचन आगत्य उक्तवन्तः - ''इदानीं वधूवरयोः प्रेषणं मास्तु । यतः मार्गे शत्रवः राक्षसाः इव एतयोः संहारार्थं स्थिताः सन्ति'' इति ।

राजा सुबाहुः अनुभवी आसीत् । सः वस्तुस्थितेः अवगमने समर्थः अपि आसीत् । अतः सः जामातृपुत्र्योः प्रेषणे सन्दिहानः आसीत् । तदा सुदर्शनः उक्तवान् - ''आवयोः प्रेषणे भीतिः किमर्थम् ? यावत् देवी अस्माकं पक्षे स्थास्यति तावत् कोऽपि शत्रुः मम केशम् अपि कम्पयितुं न अर्हति'' इति ।

ततः काशीराजः जामात्रे अमूल्यानि उपायनानि सेनां च दत्त्वा जामात्रा सह स्वयम् अपि प्रस्थितवान् । मध्येमार्गं सुदर्शनस्य आगमनं प्रतीक्षमाणाः स्थितवन्तः शत्रवः दूरात् एव एतान् दृष्ट्वा परस्परम् उक्तवन्तः - ''तत्र दृश्यते रथः । तत्र सुदर्शनः अपि दृश्यते । सपत्नीकः आगच्छन् अस्ति सः । तं संहराम वयम्'' इति ।

सुबाहुः शत्रुराजान् अवरुद्धवान् । सुदर्शनः मन्त्रजपम् आरब्धवान् । देव्याः ध्यानं कृतं तेन । तत्समये युधाजित् शत्रुजित् च तम् आक्रान्तवन्तौ । एतस्मात् कुपितः सुबाहुः युधाजितः उपरि बाणवर्षणम् आरब्धवान् । उभयोः अपि घोरं युद्धं प्रवृत्तम् ।

एतदभ्यन्तरे जगदम्बा पुष्पमालालङ्कृता सिंहवाहनम् आरूढा, आयुधैः उपेता च सती प्रत्यक्षा जाता । देवीं दृष्टवतः सुदर्शनस्य शरीरं पुलकितं जातम् । सः तां श्वशुराय दर्शयन् अवदत् - ''इतःपरं भीतेः न कोऽपि

अवसरः'' इति । ततः सः रथात् अवतीर्य सपत्नीकः देवीं साष्टाङ्गं नमस्कृतवान् ।

तस्याः वाहनं सिंहं दृष्ट्वा शत्रुगजाः भीताः । ते प्रतिगमनम् आरब्धवन्तः । तदा सिंहः सकृत् गर्जनम् अकरोत् । तस्मिन् एव समये महान् वायुः अपि आगतः। अतः शत्रुराजाः किङ्कर्तव्यतामूढाः सन्तः स्थितवन्तः ।

तदा सुदर्शनः सेनापतिम् उक्तवान् - ''महादेवी अस्माकं पक्षे अस्ति । अतः भवान् निस्सङ्कोचं शत्रूणाम् उपरि पततु । एतदर्थं सेनाम् आज्ञापयतु'' इति ।

एतदनन्तरं काशीराजस्य सेना शत्रुपक्षस्य उपरि अपतत् । निश्चेष्टतया स्थितान् राज्ञः युधाजित् अवदत् - ''सिंहम् आरुह्य आगतां काञ्चित् स्त्रियं दृष्ट्वा किं भवन्तः सर्वे दिग्भ्रान्ताः ? स्त्री अबला इति किं न ज्ञायते ? अग्रे सरन्तु । क्षणाभ्यन्तरे सुदर्शनं मृत्युवेदिकाम् आरोपयाम । काशीराजस्य पत्नीं च वशीकरवाम'' इति । ततः सः पौत्रेण शत्रुजिता सह गत्वा सुदर्शनेन सह युद्धम् आरब्धवान् ।

तदा देवी सर्वेभ्यः राजभ्यः स्वस्य विविधानि रूपाणि दर्शितवती । सर्वैः सह एकाकितया युद्धम् आरब्धवती च । क्षणाभ्यन्तरे युधाजित् शत्रुजित् च देव्याः बाणानां बलिभूताः सन्तः भूमिम् आश्रितवन्तः । सुबाहुः आनन्दाश्रूणि स्रावयन् पराशक्त्याः स्तोत्रं कृतवान् । ततः सः देवीम् अवदत् - ''जगदम्ब ! भवत्याः दर्शनतः अहं धन्योऽस्मि । मम हृदये स्थिरतया तिष्ठतु भवती । यावत् भूमिः स्थास्यति तावत् काशी अपि अविनाशिनी इति वचनं श्रूयते । एतस्यां नगर्यां भवती वसतु । मां काशीं च शत्रुभयात् विदूरं करोतु । भवत्याः साहाय्यम् अस्ति चेत् किम् अन्यत् आवश्यकं मम ?'' इति ।

महादेवी एतस्याः प्रार्थनायाः पुरस्कारम् अङ्गीकृतवती । ततः सुदर्शनः महादेव्याः स्तोत्रं कृत्वा - ''अम्ब ! इदानीं मम कर्तव्यं किम् ? मया कुत्र गन्तव्यम् ? अहं तु स्वयम् असमर्थः । तथापि भवत्याः अनुग्रहः अस्ति चेत् कठिनातिकठिनम् अपि कार्यं लीलया साधयिष्यामि । अतः मम कर्तव्यम् उपदिशतु कृपया'' इति प्रार्थितवान् ।

''इदानीं सपत्नीकः अयोध्यां गच्छतु । सिंहासनम् आरुह्य न्याय्येन मार्गेण राज्यं परिपालयतु । अहं भवतः रक्षणं करिष्यामि । अष्टम्यां नवम्यां चतुर्दश्यां च मम पूजां करोतु । शरत्कालः मम प्रियः कालः । नवरात्रपर्वकाले मम पूजा क्रियताम् । माघे चैत्रे ·

आश्वयुजे आषाढे च मदीयम् उत्सवम् आचरतु'' इति उक्त्वा ततः अदृश्या अभवत् महादेवी ।

ततः अन्ये राजानः एकैकशः अग्रे आगत्य यथा देवदेवताः इन्द्रं, तथा सुदर्शनं प्रणमन्तः अम्बायाः स्तुतिं कृतवन्तः । ते सर्वे सुदर्शनं चक्रवर्तित्वेन अङ्गीकृतवन्तः ।

अयोध्याप्राप्तितः पूर्वम् एव सुदर्शनस्य आगमनवार्ता अयोध्यावासिभिः प्राप्ता । अतः मन्त्रिप्रभृतयः मङ्गलवाद्यसहिततया आगत्य स्वागतं कृतवन्तः । सुदर्शनं सपत्नीकं सादरं प्रासादं नीतवन्तः ।

सुदर्शनः स्वस्य विमातुः समीपं गतवान् । सा स्वपुत्रस्य विनाशस्य निमित्तं रुदती आसीत् । सः विमातरम् उक्तवान् - ''अम्ब ! भवत्याः पुत्रं पितरं च अहं न मारितवान् । महाशक्त्या तयोः संहारः कृतः । तौ स्वस्य पापानां कारणतः एव मरणं प्राप्तवन्तौ । भवती माम् एव स्वपुत्रं भावयतु । अहं सदा भवत्याः सेवां करिष्यामि । यदा अहं बालकः आसं तदा भवत्याः पिता लोभेन मां देशात् निष्कासितवान् । एतत् मम दौर्भाग्यं भावितवान् अहम् । इदानीम् अपि कस्यचित् अपि विषये मम द्वेषः नास्ति । कस्मिंश्चिदपि मम शत्रुभावः अपि नास्ति'' इति ।

एतत् श्रुत्वा लीलावती लज्जाभावेन उक्तवती - ''मया निवार्यमाणः अपि मम पिता भवद्विषये द्रोहं कृतवान् । तस्य परिणामतः सः स्वयं मरणं प्राप्तवान् । पुत्रस्यापि मरणस्य कारणं जातः । भवतः माता मम सपत्नी । अतः भवान् अपि मम पुत्रः एव । भवान् मम पितुः पुत्रस्य च कारणं न इति अहं जानामि । अतः मया किमर्थं चिन्ता करणीया ?'' इति ।

तदनन्तरं सुदर्शनः मन्त्रिणां साहाय्येन एकं सुवर्णसिंहासनं निर्मापितवान् । तस्य उपरि जगदम्बायाः प्रतिष्ठापनं कृतम् । प्रतिदिनं तस्याः पूजा अपि आरब्धा । ततः तस्य राज्याभिषेकः प्रवृत्तः । अनन्तरं सः न्याय्येन मार्गेण राज्यं पालयन् सुखेन जीवितवान् ।



कार्ये प्रवृत्तिः

राघवः प्रतिदिनं मन्दिरं गत्वा पुराणकथाः श्रावयति स्म । कोऽपि कमपि सन्देहं पृच्छति चेत् यथायोग्यम् उत्तरं वदति स्म सः । एतदर्थं प्रातः एव सः सन्नाहं करोति स्म । याः कथाः उच्यन्ते तासां विषये सम्यक् अधीत्य सम्भाव्यप्रश्नानाम् उत्तरकथने सामर्थ्यं सम्पादयति स्म सः ।

राघवस्य पत्नी सीता । सा कार्पासतः वर्तिकां निर्माय विक्रयणं करोति स्म । राघवसीतयोः त्रयः पुत्राः । ज्येष्ठः पुत्रः तक्षकवृत्तिं करोति स्म । तस्य पत्नी कमला । सा आदिनं गृहकार्येषु मग्ना भवति स्म । द्वितीयः पुत्रः कुमारः । सः अभिनयनिपुणः सङ्गीतविद्वान् च । अतः जनादरणपात्रतां गतः आसीत् सः । तृतीयः पुत्रः नरसिंहः । सः गृहपरिसरे उद्यानं निर्मितवान् आसीत् । उद्याने फलवृक्षाः, शाकादयः च वर्ध्यन्ते स्म । शाकादीनां विक्रयणतः सः उत्तमम् आयं प्राप्नोति स्म । आलस्यं दूरीकृत्य आदिनं कार्ये मग्नाः भवन्ति स्म सर्वे । अतः समग्रे ग्रामे सर्वेऽपि राघवस्य परिवारस्य प्रशंसां कुर्वन्ति स्म ।

पार्श्वग्रामे माधवस्य परिवारः आसीत् । तत्र तु राघवपरिवारे यत् सामञ्जस्यं दृश्यते तस्य विरुद्धा स्थितिः । श्वश्रूस्नुषयोः कलहः, भ्रात्रोः विवादः, परस्परतर्जनं च तत्र नित्यविषयः आसीत् । अतः माधवः एकस्मिन् दिने अपि शान्त्या सन्तोषेण च स्थातुं न अर्हति स्म । राघवस्य दूरबन्धुः माधवः । माधवः राघवपरिवारस्य विषये श्रुतवान् आसीत् एव । राघवपरिवारे ये शान्तिसौमनस्यादयः दृश्यन्ते तेषां कारणं

ज्ञातुम् इच्छन् माधवः पत्न्या सुलक्षणया सह कदाचित् राघवस्य गृहं प्रति गतवान् ।

राघवः तौ सन्तोषेण स्वागतीकृतवान् । एकं दिनं यावत् सर्वे आनन्देन वार्तालापं कृतवन्तः । अनन्तरदिने प्रातः राघवः यथापूर्वम् अध्ययने प्रवृत्तः जातः ।

तदा माधवः आक्षेपपूर्णस्वरेण अवदत् - "दिनद्वयं भवता सह सन्तोषेण स्थातव्यम् इति चिन्तयित्वा अहम् अत्र आगतः । किन्तु भवान् अध्ययने प्रवृत्तः । अध्ययनं तु प्रतिदिनं क्रियते । अतः पुस्तकं पिदधातु । सन्तोषेण वार्तालापं करवाव" इति ।

एतत् श्रुत्वा राघवः हसन् उक्तवान् - "दीर्घकालात् अनुवर्तितः अभ्यासः सकृत् परित्यक्तः चेत् पुनः तस्य समीकरणं कष्टसाध्यम् । ह्यः आदिनं वार्तालापः कृतः । अद्यापि यावत् आवश्यकं तावत् वार्तालापः क्रियते एव । इदानीं तु तादृशी आवश्यकता नास्ति । अतः अहं पठने उद्युक्तः । भवान् अपि मया सह पुराणसाहित्यं परिशीलयतु । तेन भवता अपि आनन्दः प्राप्यते, ममापि उत्साहः वर्धते । समयोऽपि योग्येन क्रमेण यापितः स्यात्" इति ।

"भवतः कथनात् मम भासते यत् अहं भवतः गृहम् आगत्य भवदीयं समयं व्यर्थीकृतवान् इति । चिन्तने विघ्नः उत्पादितः मया । इतःपरं भवतः गृहं प्रति न आगन्तव्यं मया" इति असन्तोषेण उक्तवान् माधवः ।

"भवतः आगमनं मम पीडायै इति मया कदापि न चिन्तितम् । आवां मिलित्वा पुराणं परिशीलयाव । तत् भवते न रोचते चेत् स्थगयाव । अग्रे किं करणीयम् इति चिन्तयाव" इति उक्तवान् राघवः ।

ततः उभौ अपि पुराणाध्ययने मग्नौ जातौ । माधवस्य ये ये सन्देहाः भवन्ति स्म तेषां सर्वेषां समाधानं समीचीनतया वदति स्म राघवः । अल्पे एव काले पुराणाध्ययने माधवस्य आसक्तिः प्रवृद्धा । पुराणेषु एतादृशं गभीरं ज्ञानं भवति इति तेन तस्मिन् एव दिने ज्ञातम् ।

अतः माधवः राघवम् उक्तवान् - "अहम् अद्यावधि कूपमण्डूकः इव आसम् । इतःपरं पुराणाध्ययनार्थम् एव भवतः गृहम् आगमिष्यामि तदा तदा । मम गृहं प्रति यदा भवान् आगमिष्यति तदा कश्चन पुराणग्रन्थः भवता अविस्मृत्य आनेतव्यः" इति ।

एतस्मिन् एव काले माधवस्य पत्नी सुलक्षणा सीतां वदति स्म – ''एतस्मिन् वार्धक्ये किमर्थम् एषः वर्तिकानिर्माण-श्रमः ? स्नुषा तु गृहे अस्ति एव । अतः भवती सुखेन कालं यापयतु । किम् एतादृशेन श्रमेण ?'' इति ।

''यदा शरीरे सामर्थ्यम् आसीत् तदा समग्रं गृहकार्यम् अहम् एव करोमि स्म । इदानीं तु सुखेन उपविशामि । व्यर्थ-कालयापनं न रोचते मह्यम् । अतः वर्तिकां निर्मान्ती भवामि'' इति उक्तवती सीता ।

तदा सुलक्षणा पुनः उक्तवती – ''भवती एकत्र उपविश्य वर्तिकां निर्मान्ती तिष्ठति चेत् स्नुषा भवत्याः विषये सर्वथा अनादरवती भवेत् । भवती उपस्थिता चेत् न उत्तिष्ठेत् अपि सा । पाकविषये गृहव्यवस्थाविषये वा भवत्याः मार्गदर्शनम् अपि न पृच्छेत् । गृहे भवती ज्येष्ठा काचित् अस्ति, भवत्याः आदरः करणीयः इत्येतत् एव विस्मृतवती भवेत् सा । भवतीं परकीयां भावयेत् अपि । अतः स्वस्थानस्य रक्षणं करणीयम् एव खलु भवत्या ?'' इति ।

एतत् श्रुत्वा सीता मन्दहासपूर्वकम् उक्तवती – ''पूर्वम् अहम् अपि एवम् एव चिन्तयामि स्म । प्रतिवेशिनीनां पुरतः स्नुषायाः निन्दनम् अपि करोमि स्म । स्नुषां तर्जयामि स्म अपि । एतस्मात् मम मनसः शान्तिः अपगच्छति स्म । स्नुषायाः विषये प्रतीकारभावना मयि भवति स्म । तेन च रक्तचापः वर्धते स्म । ततः अस्वास्थ्यम् अपि भवति स्म । तदा वैद्येन सूचितं यत् विना कार्यं कदापि न स्थातव्यं, सामर्थ्यानुगुणं किमपि कार्यं करणीयम् इति । यदि कार्यम् एव न भवति तर्हि मनसि अनेके सन्देहाः उत्पद्यन्ते । ततः मनः दुश्चिन्तनस्य आश्रयः भविष्यति । यदि कार्ये निरन्तरप्रवृत्तिः भवति तर्हि मनः दुष्टचिन्तनं न करोति । गृहे शान्तिः भविष्यति'' इति ।

सुखशान्त्योः कारणं किम् इति एतस्य श्रवणात् अवगतवती सुलक्षणा ।



भूस्वामिनः वयः

द्रोणपुर्याः राज्ञः मणिचन्द्रस्य अकालमरणं जातम् । तदा पञ्चविंशतिवर्षीयः तदीयः पुत्रः भुवनचन्द्रः सिंहासनम् आरुह्य राज्यशासनम् आरब्धवान् । राज्यशासने साहाय्यं कर्तुं समर्थाः मन्त्रिणः आसन् एव । अतः राजा तदा तदा मृगयार्थं गच्छति स्म, दशपञ्चदशदिनानाम् अनन्तरं राजधानीं प्रत्यागच्छति स्म च ।

भुवनचन्द्रः कदाचित् मृगयार्थं गतवान् । रात्रिः जाता । राजा सैनिकान् पृष्टवान् - ''अद्य रात्रौ वासं कुत्र करवाणि ?'' इति । तावता शेखरवर्मनामकः भूस्वामी तत्र आगत्य राजानं निवेदितवान् - ''अद्य रात्रौ मम गृहं प्रति आगत्य आतिथ्यं स्वीकरणीयम्'' इति । राजा एतत् अङ्गीकृत्य शेखरवर्मणः गृहं गतवान् ।

रात्रौ वार्तालापसमये भुवनचन्द्रः शेखरवर्माणम् अपृच्छत् - ''भवतः किं वयः ?'' इति ।

''महाराज ! षष्टिः सप्ततिः वा वर्षाणि स्युः मम'' इति उक्तवान् शेखरवर्मा ।

तदा भुवनचन्द्रः आश्चर्येण पृष्टवान् - ''वयः दिने दिने वर्धते । आयुः क्षीयते । क्षीयमाणस्य आयुषः गणना सम्यक् करणीया खलु ? किम् एतद्विषये कदापि न चिन्तितम् एव भवता ?'' इति ।

एतत् श्रुत्वा शेखरवर्मा हसन् उक्तवान् - ''महाराज ! मम विशाला कृषिभूमिः अस्ति । पेटिकासु धनराशिः अस्ति । एतेषां सर्वेषां विषये अहं सावधानः भवामि, यतः एतेषाम् अपहरणसम्भावना अस्ति । किन्तु वयसः अपहरणं कर्तुं न शक्यते । अतः तस्य विषये चिन्तनं, तदर्थं समयव्ययः च व्यर्थः इति भावना मम'' इति ।

- काशीनाथः

9
चन्दमामाप्रस्तुतिः
अजेयः गरुडः
चित्रे - पाणिः
चन्द्रपुर्याः स्वर्गस्थस्य प्रधानमन्त्रिणः पुत्रः आदित्यः सेनापतेः नरेन्द्रदेवस्य, तत्पुत्रस्य रवीन्द्रदेवस्य च विविधानि कुतन्त्राणि विफलीकृतवान् । राजा महेन्द्रदेवः आदित्यं प्रधानमन्त्रिणं कृतवान् । पितुः आदेशस्य अनुसारं सप्तम्यां पूर्णिमायां पूजां कृतवान् आदित्यः । तदा प्रकोष्ठः प्रकाशमयः जातः । पुरतः स्थिता पिञ्छमूर्तिः महाकारता प्राप्य तस्य पुरतः अतिष्ठत् ।
तेन च प्रकाशने आदित्यः पूर्णरूपेण आवृत्तः । तदीयशरीरे परिवर्तनं जातम् । एतच्च अवगतम् आदित्येन ।
अल्पे एव काले तदीयं शरीरं पक्षद्वयेन युक्तं जातम् ।
तस्य शिरसि चञ्चुः उद्भूता । तस्य नेत्रे रक्तवर्णीये जाते । पादौ धातुमयेन आवरणेन आवृतं जातम् ।

हे भगवान् ! कृपासागर ! मातृभूमेः रक्षणार्थम् एव सन्ति एते मम प्राणाः । कर्तव्यपालने अप्रमत्तः भविष्यामि अहम् । किन्तु एतत् रूपं धृत्वा कथम् अहं जनानां पुरतः गच्छेयम् ?
पुत्र ! एतत् रूपपरिवर्तनं भवता एकेनैव ज्ञायते, न अन्येन । अन्ये भवतः एतत् रूपं द्रष्टुं नार्हन्ति । पूर्वजैः यत् पूजनं कृतं तस्य फलम् एव एतत् । मम शक्तिः भवति सङ्क्रान्ता अस्ति ।
एतस्याः उपयोगः भवता मातृभूमेः रक्षणार्थम् एव करणीया । मम आराध्यदेवः अपि भवतः रक्षणं करिष्यति । भवान् धैर्येण सर्वाणि कार्याणि करोतु ।
आदित्यः ! भवतः काऽपि हानिः न स्यात् इति उद्देशेन अहम् अत्र उपस्थितः अस्मि भवतः विषये मम विशेषाभिमानः अस्ति प्रायः भगवान् भवन्तं साधनारूपेण चितवान् अस्ति कार्यसाधनार्थम् भवतः विजयः सुनिश्चितः ।
परितः प्रसृतः प्रकाशः पुञ्जीभूय आदित्यस्य शरीरं प्राविशत् । तेन तं परितः रक्षाकवचं निर्मितम् अभवत् इव ।

कः उपस्थितः स्यात् इदानीम्
प्रकोष्ठे पुनः अन्धकारः प्रसृतः । द्वारताडनशब्दः श्रुतः आदित्येन ।
अरुणे ! भवती !!
इतः निर्गच्छन्ती अहं एकं प्रकाशम् अपश्यम् । ततः मूर्च्छाम् अगच्छम् । यदा सचेतनतां प्राप्य अत्र आगता तदा भवदीयौ अङ्गरक्षकौ अपि मूर्च्छितौ दृष्टौ मया । आदित्य ! कुशली खलु भवान् ।
अहं निरापदः अस्मि । अत्र यः अनुभवः प्राप्तः तं कमपि मा वदतु इति मम प्रार्थना । इतः गता भवती रामसिंहाय एतत् ददातु ।
आदित्य ! भवन्तं परितः किमपि विशेषकवचम् अस्ति इति भाति । भवतः सन्देश-वहनं मम सौभाग्यस्य विषयः । एषाऽहं प्रस्थिता ।
अहमेव एतदर्थं किमर्थं चितः तात ! अहं तु सामान्यः ।
भवतः इच्छां पूरयिष्यामि इति प्रतिजाने । तदर्थम् एव जीवनं मम ।
तस्मिन् एव समये गरुडः इव मुखावरणं धृत्वा केचन लुण्ठनम् आरब्धवन्तः ।



एषा वार्ता आदित्येन प्राप्ता ।
श्रीमन् ! एतत्सर्वम् नरेन्द्रदेवेन कृतं कुतन्त्रम् ।
रामसिंह ! अस्माभिः एतस्य योग्यं दण्डनं करणीयम् ।
महाराजस्य प्रकोष्ठे अनन्तरदिने
गरुडवेषं धृत्वा आगताः षड् आसन् महाराज !
सर्वेषां पुरतः श्वः ते शूलम् आरोपणीयाः । एतां वार्तां सर्वत्र श्रावयतु ।
यथाज्ञापयति महाराजः ।
समग्रे देशे एषा वार्ता प्रसारिता ।
रवीन्द्रदेवः चिन्ताक्रान्तः जातः ।
इदानीं किं करणीयम् अस्माभिः ?
जनानां पुरतः शूलारोपणं कथमपि स्थगनीयम् ।
अनुवर्तते

राजनर्तक्याः चित्रम्

पूर्वम् अवन्तीनगरे सुहर्षनामकः कश्चन युवकः चित्रकारः वसति स्म । तस्मिन् नगरे अन्येऽपि श्रेष्ठाः चित्रकाराः आसन् एव । तथापि जनाः सुहर्षस्य एव प्रशंसां कुर्वन्ति स्म आधिक्येन । धनिकाः वणिजः राजकुटुम्बीयाः च तस्य द्वारा चित्राणि लेखयित्वा तस्य भूरिप्रशंसां कुर्वन्ति स्म । चित्रनिर्माणानन्तरं कोऽपि प्रशंसात्मकं निन्दात्मकं वा वचनं वदति चेत् सुहर्षः मौनेन शृणोति स्म । अन्यस्य मनः यथा खिन्नं न भवेत् तथा वदति स्म च । अन्यस्य मनसः खेदनं कदापि न करोति स्म सः ।

कदाचित् राजनर्तकी भासुराङ्गी तस्य ख्यातिं श्रुतवती । सा सुहर्षद्वारा चित्रं कारितवती । ततः सा तदीयनैपुण्यस्य प्रशंसां कुर्वती उक्तवती - ''सौन्दर्यविषये नाट्यकलाविषये च ज्ञानवन्तः महापण्डिताः एतस्यां राजधान्यां सन्ति बहवः । राजा अपि तेषु अन्यतमः । ते सर्वे मम प्रशंसां कृतवन्तः । 'मम यादृशं सौन्दर्यम् अस्ति तादृशं विश्वे अन्यत्र कुत्रापि नास्ति' इति वदन्ति स्म ते । 'तेषां प्रशंसा मिथ्या न' इति भवतः चित्रस्य दर्शनस्य अनन्तरं मम स्पष्टं जातम् । अपूर्वं चित्रकलाकौशलं भवतः'' इति ।

तदनन्तरं दश वर्षाणि अतीतानि । भासुराङ्गी पुनरपि सुहर्षम् आनाय्य स्वस्य चित्रं लेखितवती । महता श्रमेण मासाभ्यन्तरे सुहर्षः तस्याः चित्रं सज्जीकृतवान् ।

भासुराङ्गी तत् चित्रं दृष्ट्वा असन्तोषेण उक्तवती - ''भवता लिखितम् चित्रं दृष्टवत्याः मम महत् आश्चर्यम् । एतत् मम चित्रम् इत्यत्र ममैव विश्वासः न भवति । किं मम एतत् रूपं दृष्ट्वा जनाः मां परमसुन्दरीं वदेयुः ?'' इति ।

तदा सुहर्षः शान्तस्वरेण अवदत् - ''देवि ! मया भवत्याः सुन्दरं चित्रं यदा लिखितम् आसीत् तदा अहं तरुणः आसम् । इदानीं मम यत् वयः अस्ति ततोऽपि दशवर्षाणि न्यूनम् आसीत् तदा मम वयः'' इति ।

– *सुमनलता*

क्रियतां शीर्षिका

चित्रशीर्षिकास्पर्धा

उपरितनं चित्रद्वयं दृष्ट्वा परस्परसम्बन्धिवाक्यद्वयेन चित्रशीर्षिकां किं भवन्तः प्रेषयितुं शक्नुयुः ?

समपत्रे लिखिता चित्रशीर्षिका अधस्तनसङ्केताय प्रेषणीया –

चन्दमामा (संस्कृतम्) 'अक्षरम्' ८ उपमार्गः, गिरिनगरम्, बेङ्गलूरु - ५६००८५

युक्ता शीर्षिका एतन्मासस्य २५ तः पूर्वं प्रेषणीया । सर्वश्रेष्ठायै शीर्षिकायै रू. १००/- पुरस्काररूपेण दास्यन्ते । पुरस्कृता शीर्षिका मासद्वयानन्तरं प्रकाशयिष्यते ।

पुरस्कृतशीर्षिका

स्मेरान्वितः गानभावः ।
स्मेरपूर्वकः प्रयाणभावः ।।

अभिनन्दनानि

'अक्टोबर्'मासीयस्पर्धाशीर्षिकाप्रेषकः –
पि.पि.करुणाकरन् नायर्
मङ्गला, बोळ्ळिकोट्, अजनूरु पो.
कासरगोड्डु जि., केरलम्

चन्दमामायाः वार्षिकं ग्राहकशुल्कं –

भारते रू. १२० – ००

Payment in favour of CHANDAMAMA INDIA LIMITED
No. 82, Defence Officers Colony, Ekkatuthangal, Chennai - 600 097

Printed and Published by B. Viswanatha Reddi at B.N.K. Press Pvt. Ltd., Chennai - 600 026 on behalf of Chandamama India Limited, No. 82, Defence Officers Colony, Ekkatuthangal, Chennai - 600 097. Editor : Viswam

The next twelve months will be eventful...

CHANDAMAMA

will bring you

- Brainrackers from your favourite Vetala
- Magical mythology
- Mindteasing contests to test and tease your skills
- Ribtickling humour to tickle your funny bones
- Fascinating feast of fables and fantasies
- Indiascope, which brings you the richness of Indian heritage
- Heritage puzzles and activity, special issues to mark occasions and lots more.....

Now you know why you ***must*** subscribe to Chandamama

(Sanskrit) DECEMBER 2001
Regd. with RNI. No. 42664/85
Registered No. TN/Chief PMG-867/2001